संस्कृत-विमर्शः

(प्रथम-द्वितीयभागौ १९८८)

प्रधान संपादकः

डॉ॰ मण्डन मिश्रः, निदेशकः

संपादकः

पं॰ श्री संपन्नारायणाचार्यः

न्यायमीमांसा:, वेदान्त विद्वान्

उपनिदेशकः

राष्ट्रिय संस्कृत संस्थानम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृत - विमर्शः

(राष्ट्रिय संस्कृत संस्थानस्य षाण्मासिकी शोध पत्रिका)

षोडशः खण्डः | १९८८ | प्रथम-द्वितीयभागौ

प्रधान सम्पादकः
डा० मण्डन मिश्रः, निदेशकः

सम्पादकः
पं० श्री संपन्नारायणाचार्यः
न्यायमीमांसा, वेदान्त विद्वान्
उपनिदेशकः

राष्ट्रिय संस्कृत संस्थानम्
राजा गार्डन, नई दिल्ली-२७
मूल्यम् पञ्चदशरूप्यकम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशकः
डॉ० मण्डन मिश्रः, निदेशकः
राष्ट्रिय संस्कृत संस्थानम्
ए-४०, विशाल इन्क्लेव, राजा गार्डन
नई दिल्ली-२७

मूल्यम् पञ्चदशरूप्यकम्

मुद्रकः
अमर प्रिंटिंग प्रेस
८/२५, विजय नगर, दिल्ली-९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषय-सूची

१. सङ्गीतं च शिल्पशास्त्रम् १
—रा. गणेशः
२. प्रमात्व परिष्कारः १२
—का. ई. देवनाथः
३. प्राचीनसाहित्ये तमसोल्लेखाः २६
—डॉ० कैलाशनाथ द्विवेदी
४. सम्प्रदानत्व विमर्शः ३४
—केशव कुमार रायः
५. काश्मीरे संस्कृतम् ४५
—दीनानाथ यक्षः
६. संहिता तदन्तर्गत ध्वनि प्रक्रिया ५८
—श्री शिव कुमार मिश्रः
७. सहार्थश्च साहित्यम् ८३
—डॉ० श्री बालशास्त्री
८. कालिदाससर्वस्वे रामायणानुवर्तिता ९२
—डॉ० जयश्रीः चट्टोपाध्याय
९. विवर्त विपरिणाम समीक्षा १०३
—बलबहादुर शास्त्री
१०. काव्यकलानिधौ चित्रालंकारः १०९
—डॉ गायत्री देवी
११. संस्कृतस्य महिला रचनाकर्त्र्यः ११५
—डॉ कैलाशनाथ द्विवेदी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सङ्गीतं च शिल्पशास्त्रम्

मङ्गलाचरणम् ॥

शिल्पसङ्गीतचित्रेषु यन्त्रतन्त्रक्रियासु च ।
अन्तस्थतत्त्वमीमांसा व्यञ्जिकां नौमिभारतीम् ॥

—रा. गणेशः

कारिका ॥

चित्रं, वास्तु, प्रतिमा, यन्त्रमिति च विभजिते तु शिल्पाचारे ।
प्रणवोद्भवसङ्गीत स्पन्दनगतिरथ कथमिति विशदीक्रियते ।१।

वृत्तिः ॥ सम्प्रति भारतीयसङ्गीतशिल्पयोः मध्यगं साम्यं च तयोरेकयोनित्वं चैकलक्ष्यं तथा परमादर्शमुखीभूताद्वैतदृष्टिं च सनातनतत्त्वशास्त्रादिसायकैः केवलं दिङ्मात्रं सूचयितुं अत्र यत्नो विधीयते । तत्पूर्वं शिल्पशास्त्रं प्रतिमाशिल्पं, वास्तुशिल्पं, यन्त्रशिल्पं च चित्रशिल्पमिति विभज्य तेषां साकं ओंकार सञ्जातं सङ्गीतं कथं स्पन्दते इति निरूप्यते । तस्मात् स्वरचिताष्टादशकारिकाभिश्च स्वकीयैः वृत्तिवाक्यैर्यथोचितं

---

1. A paper read under the auspices of 'Pavani International Institute of Musicology'. Bangalore centre at Bangalore on 12. 1. 1986 (Sunday). This is the original analysis of the Author which Compares the sound vibrations of Music with that of Architecture both classical & Modern emphasising the natural frequency stress-strain etc., in classical Sanskrit language using the traditional karika & vritti scheme.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशदीक्रियते। अत्र न केवला पुरातन भारतीयशिल्पकलाविवृतिः परन्तु नवीनयन्त्रतन्त्रविचाराणां मलाधाराणि सूत्राण्यपि कथं सङ्गीततरङ्गसंवादिन इति वितर्कितानि ॥

चत्वारिपदैर्नादो जातो ब्रह्माऽक्षरोनिगमतरुमूलम्।
संगीतं श्रुतिजातं सहकारी सामगायनेऽपि च तत्त्वम्।२।

वृ ॥ ऋग्वेदीयनासदीयसूक्तोक्त-नासदासीन्नोसदासीत्तदानीं… इत्यादिभिः एकोऽव्यक्तवस्तु कथमनेकव्यक्तरूपधारणपूर्वमासीदिति ज्ञायते। तथा च पुरुषसूक्तोक्ताधियज्ञरीत्या सृष्टिप्रक्रियाविवृत्या अपि एकं सदनेकरूपान्वितं जातमिति स्पष्टम्। अन्यच्च, उपनिषत्सु साक्षात्कारितैः सर्वं खल्विदं ब्रह्म, रसो वै सः, सत्यं ज्ञानमनन्तं ब्रह्म—इत्यादिभिः सर्वसृष्टि शक्तिरपि एकमेवाद्वितीयपरब्रह्मेति ज्ञायते। तत्परवस्तुप्रकटन रूपोवेदः। तं वेदं दर्शिताः खलुद्रष्टारः मुनयः। तेषां दर्शनं छन्दोबद्धे शब्दमाध्यमे हि। अपि च समस्त वर्ण शब्द-ध्वन्यात्मकप्रपञ्चसृजनविचारे स्फोटवादिनः भर्तृहरि-भट्टोजिदीक्षित-पुण्यराजहेलाराजादयः 'नृत्तावसाने नटराजराजः ननादढक्कां नवपञ्चवारं उद्दर्तुकामो सनकादिसिद्धान् एतद्विमृश्ये शिवसूत्रजालं'। इति च; 'अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरं विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः' इति; 'ओमित्येतदक्षरं इदं सर्वं वागेव विश्वाभुवनानि जज्ञे ओंकार एव सर्वा वाक्, देवीं वाचमजनयन्त देवाः' इत्यादि श्रुतिवचननिर्वचनैश्च समस्तमूलाङ्कुरः ओंकारनाद इत्येव निर्णयन्ति। इत्थं विश्वे नादपारम्यः। सृष्टौ प्रत्येकेषु जीवाजीवविशेषेष्वपि निर्दिष्टस्पन्दनानि सन्त्यप्यस्माकं निदानमिदानीं तस्मिन्नेव नादमूलान्वेषणं क्रियते॥

'चत्वारिवाक् परिमितापदानी'ति ऋगनुसारं तथा 'भिद्यमानात्पराद्बिन्दोरव्यक्तात्मारवोऽभवत्। शब्दब्रह्मेतितं प्राहुस्सर्वागमविशारदाः। पराद्बिन्दोरित्यनेन शक्त्यवस्थारूपो यः प्रथमो बिन्दुः, तदव्यक्तात्मा वर्णादि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशेषरहितोऽखण्डो नादमात्रोत्पन्नः'...इत्यादितत्त्वचिन्तामणि वाक्यानुसारं च; प्राणापानगत्या मूलाधारे जायते अनाहतः नादः। अयं सरस्वतीव्यूहमातन्वते। अयमेव 'प्रचो देवी सरस्वती...' 'निषिसीदसरस्वतीत्यादिमन्त्रैः वेदे ऋषिवरैः दर्शित इति आर्यजन विश्वासः।

अनेन हेतुना हि देहस्थाः चतुर्दशनाड्यः कार्याचरणबद्धाः। इयं सरस्वती वर्णात्मिका भूत्वाऽकाशे यदा प्रसरति तदा तत्र प्रादुर्भवति गणपतिव्यूहः। प्राणापानयोस्सङ्घर्षणजाताहतशब्दः 'त्सब्' इति भूत्वा नाभौ प्रकटितः। प्रकटनरूपेयं 'परावाक्' अत्रतः हृदयं प्रविश्य 'पश्यन्ती' भविष्यति (एषा हि व्यक्ता वाक्)। इतोप्युपरि संक्रम्य कण्ठे मध्यमाभिधाना लसति। नादोऽयं गान्धर्वशब्दो वा सङ्गीतमिति संज्ञितः। अत्रैव शब्दप्रकटकषोडषनाड्यः सङ्गीतस्य षोडषशुद्धमध्यमरागोत्पादकाः। स्वरपल्लटक्रियया द्विगुणिताः श्रुतयः द्वात्रिंशतित्वमाप्नुवन्ति। एताः श्रुतयः विभजनपूर्वं सप्तमूलसञ्जाता इत्यनेन हि हेतुना सप्तस्वररूपिण्यः। एवं च द्वात्रिंशद्रागाः, चतुर्विंशतिश्रुतयः, तथा इडा-पिङ्गला नाडीसंयोगसञ्जातरागरागिण्यः संजायन्ते। सुषुम्नानाड्यां स्थगनेन हि नादस्यास्य सामास्सम्भवन्ति। इत्थं सर्वे कण्ठस्थानस्थ 'मध्यमा' वचसा समुद्भूताश्च प्रकटिताश्च; इतोप्युपरिगमनेन सः नादः मुखे वर्णात्मको प्रादुर्भवति। एतदेवाकारात् क्षकारपर्यन्तं विस्तृतं 'वैखरी' स्थानम्। तत्त्वं इतिचेत् तत्+त्वं इति पदविभागादुद्दिष्टार्थः तत्त्वमसीत्येव। तत्त्वमसि ज्ञानसन्दायकानां वेदशास्त्राणां शब्दब्रह्मावतारी सङ्गीतमित्यनेन सङ्गीतमपि तत्त्वसाधनसायकमिति ज्ञायते। विदितं हि सङ्गीतं सामोपवेद इति च। अस्य साक्षीरूपिणस्सन्ति खलु हरिदासस्वामी, त्यागराजादयो बहवो नादब्रह्मोपासकाः॥

अन्तःस्थनादसत्वं चान्तः स्थंरूपकल्पनं परमार्थम्।
प्रकृतिप्रचोदनैः खलु वाच्यं दृश्यं च धीमन्तः कुर्वन्ति।३।

अन्तः स्थानाहत शब्दस्य आहत वैखरीरूपान्विता वर्णमालेयं हि निर्दिष्ट शब्दोत्पादिनी। अनेन हि जायन्ते निर्दिष्टावर्तनस्पन्दनान्विताः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तरङ्गाश्च । एते खलु विश्वस्य मूलतरङ्गसङ्केताः। सृष्ट्यारम्भस्य अखण्डाव्यक्ताचिन्त्यः वर्णातीतोङ्कारनादस्तु पराबिन्दुप्रेरणया च प्रकृत्यां विभिन्न-देश-काल-व्यक्तिरित्यावरणत्रयनिर्माणकुशलैस्तथा रजस्तमोसत्त्वगुणैः खण्डितश्च देशमान-कालमान-व्यक्तिमानाख्योपाधित्रयात्मको व्यक्तरूपेण पञ्चदशाक्षरात्मको आविर्भवति । इत्थं पुरुषमूलत्वादनाहतरूपेण सञ्जातनादस्तु प्रकृतिप्रचोदनैराहतरूपमवाप्य वाच्यो भूत्वा वैखरीति निर्गच्छति । अपि च समस्त विश्वस्य चराचर सृष्टि-स्थितिलयादीनां हेतुर्व्यवस्थितो नादः। अस्योत्पादनेनैव त्रिकार्यकरणशक्तिर्जायते। तथा हि प्रत्येक रस भावादीनां समुचितावर्तकनादतरङ्गाः मूलमातृकाः। तस्मादेव विशिष्टरागरागिणीगुणाः विभिन्नाः। अस्मिन् वर्त्मन्येव शिल्पशास्त्रमपियुज्यते। अन्तःस्थ कल्पनं हि बाह्यप्रकृतिप्रचोदनेन साकारत्वं याति। अयमग्रे स्पष्टीक्रियते ॥

अन्तः चोदितसन्ततरसार्द्र भावलहरीविलासानन्दे ।
विधुवदनं सङ्गीतं मधुरललितभव्यमूर्तिरूपं शिल्पम् ।४।

केवलमत्रसङ्गीतशिल्पयोर्मैत्री विशदीकृतास्ति । अन्तः प्रचोदनसञ्जातेखलूभये । तस्मादन्तर्भावप्रकाशनस्य मौखिकं रूपं सङ्गीतं—साकारीकृतघनरूपंशिल्पमित्युच्यते । एकमेव भावमनुभूय तमेवाभिव्यञ्जयितुं मौखिकाकारिकरूपद्वयेहि उद्दिष्टौकलाविभागौ ॥

श्रुतिगोचरतत्त्वार्थं विभूतिरूपे खचिततयाबध्नातुम् ।
कृतयत्नः प्रतिमाणां निर्माणो हि सगुणीकरणमगुणस्य ।५।

निसर्गसहजनैजाव्यक्ततत्त्वं तु परात्परवस्तुनःविशेषप्रकटीकृतरूपेषु दर्शयित्वा, तमेव वागतीतं रूपातीतं च गुणातीतं वाक्षुन्यस्य नादावलम्बिताः स्तुवन्ति-सम्भावयन्ति धीराः अपि च तस्य ध्यानानुकूलार्थं ध्यानश्लोकान्विरच्यताननुसृत्य सगुणसाकारसुन्दरप्रतिमानिर्माणकरणक्षमाः जाताः ज्ञानिनः । एवमनिर्वचनीयं तु स्तुति सङ्गीतादिभिश्च, रूपविवर्जितं सदृशरूपलेखलावण्यादिभिः सुलभसाध्यं चाद्यं कृत्वाऽराधयन्ति सुधियः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनेन खलु ज्ञायते सङ्गीत शिल्पयोः पूर्वरूपोत्तररूपयुगलव्यवस्था ।।

मानैर्निर्दिष्टतया संख्याभिः प्रातिभासिकैर्गणितगुणैः ।
गीतं च शिल्परूपं कल्प्य हि मेयैरमेयतत्वं यान्ति ।६।

उभेपि कलेऽपि च कल्पनैकप्रकारेऽपि भाति गणितं बहुलम् निर्दिष्टमानैः संख्याभिश्च सापेक्षगणितगुणकगणनादिभिः (Relative Mathematical calculations) अमेयमाधुर्यं, आपातसौन्दर्यं, गणिततर्कातीतरसानुभूतिं साधयन्ति शास्त्रकलाकुशलिनः। सङ्गीतशास्त्रोक्तानां नादतरङ्गावर्तानां निर्दिष्टाः संख्याः, स्थायीभेदानुसारं द्विगुणितषड्जस्तराः, स्वरसप्तकस्य स्पन्दनगतयः। अष्टोत्तरशततालानां नियुतं गणनं, मात्राप्लुतसमार्धसमादिविवेचनं, इत्यादयः तथा शिल्पोक्ताः तालमानाः त्रिकोणमण्डल-चतस्रादिरज्जुगणितीयाः विचाराश्च शुष्कगणितभागास्सन्नपि तेषामुत्पत्तिः एकैवरसानन्दः । सर्वं लीयते किल चित्तोल्लासे ।

वेदीनिर्माणकला वेत्तारस्
सूक्तसूक्तगायन कुशलाः ।
स्वर वास्तुद्वयसंगम कुतुकाः
खलुमापनैश्च निश्चितफलिताः ।।७।।

आदिकाले विविधेषु सवनोपयुक्तेषु वेदीनिर्माणेषु हि स्थापत्यशास्त्राङ्कुरः जातः । तदा वै समजनि रज्जुगणितं च शुल्वसूत्रप्रक्रिया । नानाग्निस्थापनार्थं वृत्तायतगरुडाकृतित्रापिज्यादीनां रूपेषु निर्मीयमाणवेदिकासमहशिल्पिनः च रथन्तरमहानाम्नीत्यादिसामगायकोद्गातार अभिन्ना एव । इत्थमेव सङ्गीतशिल्पयोः संवादिप्रवृत्तिश्शनैरुद्भूता ।

स्वर-निर्माणकलाभ्यामेवमुद्भासमानसादृश्यः खचितगणिततर्कादिभिः क्रमशः निर्दिष्टः निर्दुष्टोपि जातः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वरलयभावाभिसरणगानानु-
कृतकरचरणतनुविन्यासाः ।
अनुशीलितशिल्पकलाप्रतिमा-
निर्माणरीतयो भुवि विदिताः ॥८॥

नाट्यशास्त्रानुसारं आङ्गिकं, वाचिकं, आहार्यं च सात्त्विकं इति चतुर्धाभिनयः । अभिनयचतुष्टयमेनं तु पञ्चास्यस्य लीलेति संभावयन्ति भावुकाः । तथा चादौ नादेव्यञ्जितभावस्तु तमनुकृतकरचरणाद्यङ्गाङ्ग-विन्यासे प्रसार्य शिल्पप्रतिमानिर्माणक्षमो भवति । आहार्यादयश्चापि शिल्पाङ्गाः वैः । तस्मान्नृत्यगीतशिल्पभावव्यञ्जकत्वाद्रससिद्धिः । स्थायी भावानुसारिणो स्वराः, स्वरानुसारिण्यः लयरीतयः, लयानुसारिणी भङ्गिः, भङ्ग्यनुसारिणः भावाः, भावानां संगोगाद्रसनिष्पत्तिः ॥

प्राणिरुतानुकृतस्वरमेलनवतिकलसमस्तनिर्माणकला ।
शास्त्रं तेषां नाना विवर्तनानां चिरपरिशीलनसारम् ॥९॥

प्राक्तनशास्त्राणाञ्चेदानींतनसंशोधनानुसारमपि नाना पशुपक्षि-कूजनानुकृतकार्यमेव सङ्गीतम् । षड्जंमयूरोवदतीत्याद्यमरकोशोक्ति-रेव प्रमाणम् । तथा हि नाना पशुपक्षिभ्रमण-गमन-विवर्तनानां परिशीलन-सारमेवशिल्पोत्पत्तिमूलमिति शिलायुगीयस्य मानवस्य गुहास्वलङ्कार-चित्रेषु रूक्षत्वेति कलाविकासविशेषतानिर्णायिकानां मतम् । सामजो वा गजः निषादस्वरप्राणी । तस्य मुखान्वितो गणपतिः मूलाधारचक्राभिमानी । तत्रैव नादोत्पत्तिः । अप्येवं धैवतस्वरप्राणी तुरगः । गन्धर्वस्तु तत्पर्याय-पदम् । गन्धर्वाः ज्ञानविद्याविदग्धा इति ख्याताः पुराणेषु । हयवदनो तुम्बुरुः ख्यात पौराणिकगायकश्च नारदस्पर्धी । एवमेव तुरङ्गाङ्गान्वित-मानवमुखाः किन्नराश्च सङ्गीतकलारसिकाः । ग्रीक् पुराणोक्ताः 'केन्टोरस्' [Centaur-Keyropus] जना अपि गायकाः (तेषां 'कैरोन्' इत्येकः बहु प्रसिद्धः) । ते सर्वे किन्नरसदृशाः रूपे । इत्थं विभिन्नप्राणि-रूतानुकृतसङ्गीतजन्मविचारे साम्याश्च साक्षिणश्च भान्ति ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वस्तूनां गात्रानां सान्द्रत्वानां च सानुरूपो शब्दः।
सञ्जायते हि तेषां स्थायी श्रुतितारतम्यसदृशं गीतम् ॥१०॥

अत्राहतशब्दोत्पत्तिविचारश्च तस्य गुणादयः निरूपिताः। आहतशब्दाः षड्विधाः—शारीरजः, नखजः. धनुर्जः, वायुजः चर्मजः, लोहजः इति। तैरेव स्वरोत्पत्तिः। स्वर्यन्ते इति स्वराः इति ऋक्प्रातिशाख्योक्तिः। अत्र विविधनादाश्रयाणां गात्र-सान्द्रत्वानुगुणमेव शब्दविशेषनिर्णय इति भौतिकशास्त्रे निरूपितोप्यस्ति। सान्द्राधिक्येषु वस्तुषु तीव्रप्रसारगुणान्वितो नादः; बृहद्गात्रदैर्घ्यादिभिरनुमन्द्रस्थायिनि व्याप्तो नाद; ह्रस्वाल्पत्वलघुत्वादिभिस्तीव्र-तारातितारस्थायिव्याप्तश्च। पुरुषाणां ध्वनिपेटिकायाः गात्राधिक्य एव स्त्रीजनसदृशोपरिस्थायिषु गायनक्लेशकारकः। इदानीमपि वीणादिषु समस्तेषु वाद्येष्वपि मन्द्र स्वरजनकसोपानानि दूरस्थानि भवन्ति तारस्वरजनकसोपानानामपेक्षया। विदितमेव हि तरङ्गान्तराणां प्रतिलोमः स्थायीति भौतिकशास्त्रीयं सूत्रम् (Pitch is inversely Proportional to the length of the wave) दारुलोहशिलादीनां वस्तूनां गुणगणने तु शिल्पशास्त्रिणः तानि वस्तून्याहत्वा तैरुद्भूतं स्वरविशेषं श्रुत्वैव निर्णयन्ति तद्वस्तुगुणम्। शुद्धकांस्यनादान्विताः शिलाश्च खचिततया निर्गतस्वरान्विताः दारवश्च टङ्कारात्मकरवजनकलोहाः सूक्ताः इति मतम्। दोषगर्भिताश्चेत् विकटो त्रुटितश्च श्रुतिकटुरवः एव निर्गच्छति वस्तुचयैः। एवं नानानवीनविधानैः वस्तूनां योग्यायोग्यतारतम्यं क्रियते। किमुत ! अत्याधुनिकअविनाशपरीक्षायां (Non-destructive test) श्रवणातीततरङ्ग (Ultra sonic) प्रयोगैर्निर्दिष्टोपकरणस्य ऋजुतां विजानन्ति। इत्थं सङ्गीतशिल्पे अन्योन्याश्रिते हि ॥ तथा च पम्पा-मधुराशुचीन्द्रमित्यादिषु क्षेत्रेषु विद्यमानेषु देवालयेषु विशेषतया भासमानाः सङ्गीतस्तम्भाः शिल्पसङ्गीतयो मैत्रीसुवर्णसेतवः न केवलं; तयोरभेदत्वस्थापकाः वै। कुतः तेषां आकृतिप्रमाणादयः शिल्पकला कौशलस्य च गाढसङ्गीतज्ञानस्य द्योतकास्तत्कालीनानां शिल्पिजनानाम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सान्द्राघनसंप्रोडन सुविधिभ्यां शब्दनिर्मितिः किल लोके ।
वास्तूनां निर्माणे तथाह्युभय तोलनकरहितसम्मिलनैः ।।११।।

आहतशब्दोऽस्माकं निदानकेन्द्र इदानीम् । अस्य प्रसारार्थमेकस्तु माध्यमोऽवश्यः। अस्मिन् माध्यमे शब्दतरङ्गपुरोगतिर्नियुतसम्प्रोडनाप्रोडनाभ्यां वा सन्द्राघनसम्प्रोडनाख्यबहिः स्पन्दनाभ्यां—यथा वीणातन्तुस्पन्दनं नखाक्षेपेण, मृदङ्ग मुखकम्पनं करास्फालनेन, वेणुरन्ध्रनिर्गतनादवैविध्यसञ्जातस्वरवैचित्र्यं तत्रापूरितमारुतसान्द्रत्वासान्द्रत्वव्यत्ययेनच स्वरोत्पत्तिर्ध्वनिपेटिका (Vocal cords) सन्द्राघनमोचनेन । अनया जिज्ञासया हि जायते निर्दिष्टमाध्यमे शब्दोत्पत्तिश्च तस्य प्रसारः सान्द्राघनसम्प्रोडनाभ्यामिति । अस्यैव संवादी खलु चतुराङ्गिकं शिल्पशास्त्रम् । किन्तु विश्वस्थानि सर्वानि वस्तून्यणुमयानि । तेषां नैजाकृतिभिः स्वीयैच्छिकाकारविकारानुसारं तानि रूपयितुमवश्यमणुवर्तनज्ञानम् । अत्र किल विकारीकरणकाले प्रत्येकवस्तुविशेषस्यान्तरिकसन्द्राघनसम्प्रोडन सामीकरणे दायित्वम् । किन्तु; निर्विषमैरान्तरिकबलैः (forces) सर्वशिल्पाणां सौभद्र्यश्च सुस्थितिः । सर्ववस्तूनां निर्माणे आन्तरिक सन्द्राघनसम्प्रोडनतुलनञ्चानैक्यस्य तूष्णीकरणं परमावश्यकम् । अस्य मूलास्तिभारस्योपर्येव नातिगणितीयं केवलं रञ्जकैकविविधालङ्कारसङ्कुलानामास्तरणम् । तथा च सङ्गीतेऽपि स्पन्दनतरङ्गस्यान्तरिकबलानां समतोलनेनैव स्वरनिष्पत्तिरुत्पत्तिरपि । तेषामङ्गानिचापीतरसाहित्यरीतीत्याद्यलङ्काराः बाह्याः । तस्मादेव सिध्यते सङ्गीतशिल्पयोरन्तर्गतनियमावलिरेकाचाङ्गमेकमिति परन्तु द्वितीयस्तरस्थोपाङ्गादिपरिकराः प्रातिभासिकमात्रभिन्नाः । अस्य निदर्शनमिवाग्रे दीयन्ते साक्षिणः ।।

सङ्गीतवाद्यनिर्मितिरङ्गीकृतशिल्पदारुतन्त्रज्ञानैः ।
साङ्गोपाङ्गत्वं खलु यात्युभयविचारशास्त्रसारैः पूरैः ।१२।
विविधभवननिर्माणे प्रतिध्वनिध्वनिगुणाश्चशब्दतरङ्गाः ।
परिशीलिताः श्रवणहित सुस्वरसृजनानुसारमेव हि सिद्धाः ।१३।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मास्तु मधुरसङ्गीते कठोरशिल्पे कथमिति साम्यशङ्का ।
अनुमन्द्रनादजाताः शब्दतरङ्गाः शिलाश्च भिद्यन्ति किल ।१४।

एतासु कारिकासु नाद-वास्तुशिल्पयोः प्रायोगिक-प्रयोजनं निरूपितम् । अलमतिविस्तरेण । वीणामृदङ्गवेणुभेरीत्यादिवाद्यनिर्माणे कर्तृणां कियद्वास्यादुभयशास्त्रज्ञानमिति वक्तुमावश्यकतानास्त्येव । दारूणां तन्तुगणाः, वृक्षावर्ताः, काठिन्यं, सान्द्रता चेत्यादयः ज्ञातव्या एव । तथा च शिल्पशास्त्रसूक्ष्ममर्माण्यपि । अन्यच्च मूलतः साङ्गसङ्गीतविद्यापारगत्वम् ।

इदानीं तने काले विविधेषु सार्वजनिकेषु बृहद्भवनेषु, सांस्कृतिकोपयोगिषु सभाङ्गणेषु च प्रतिध्वनिप्रतिकूलत्वं निवारयितुं शब्दतरङ्गानधीत्वा भित्तिच्छदानां निर्मितिः शुद्धाऽखन्डितसुनादव्यक्तसुस्वरश्रवणानुसारं हि क्रियते । 'Acoustics' इति विद्यमानं तन्त्रमिदमेव ।

तथा च, मृदुनि सङ्गीतेऽपि कमठपाठीनकुठारकठिनपाषाणखण्डानां पिण्डीकरण-चूर्णीकरणशक्तिरस्तीति नवीनैस्संशोधनैरनुमन्द्रनादतरङ्गैः (Subsonic sound waves) प्रतिपादितमस्ति ॥

देवायतने देहे मूलाधारादिषुनिहितपरो नादः ।
देवायतने वास्तुनि विविधप्राकारलसितशिल्पंचिन्त्यम् ।१५।

आत्ममण्डिते देहेऽस्मिन् अन्नमयादयः पञ्चकोशास्तथा मूलाधारादीनि षट्चक्राणि च इडा-पिङ्गलादयः चतुर्दशनाड्यस्सन्ति । चतुर्विधासु वाक्षु नादः व्यूहेस्मिन् जातो प्रवहति च । तथैव स्थापत्यानुसारी महाद्वार-बलिपीठ-ध्वजस्तम्भ-मुखमण्टप-नवरङ्ग-गर्भगृहाख्यविभागान्वितः देवालयः । ध्यानश्लोकानां वर्णानानुरूपे प्रतिमाशिल्पनिर्माणे, अपि च करन्यासाङ्गन्यासादिभिर्जपक्रियायां, मन्त्रोच्चारणगतौ चास्य पोषकाः विचाराः प्रादुर्भवनति वै । देहान्तरङ्गरसरङ्गतरङ्गस्सङ्गीतञ्चेत् प्रकृत्यन्तरङ्गसौन्दर्यंतुरङ्गवलगनगतिश्शिल्पम् ।

षट्चक्रवर्णजालं च पञ्चभूतात्मकस्वरनिचयमूलम् ।
नानामण्डलयुक्तं विदुषस्सम्भावयन्ति चित्रं गीतम् ॥१६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तन्त्रशास्त्रिणः स्फोटवादिनश्च षट्चक्रपारम्यं तथा चतुर्विधां वागुत्पत्तिं मानयन्ति । तेषां मतानुसारं नानाविभिन्नवर्णान्वितैश्चदल-संख्यान्वितैः रेखासूचितैः कमलैः प्रतिरूपितानि षट्चक्राणि । अपि च सृष्टि-स्थिति-लय तत्त्वानां सङ्केताः पीत-नील-रक्तवर्णाः, क्रमशः चतुरस्र-वर्तुल-त्रिकोणमण्डलेषु पृथ्वीजलाग्निभूतत्रयं निर्दिशन्तीति । त्रिगुणानां वर्णाः सित-रक्त-कृष्णाः खलु । इतरेषु वर्णेष्वपि एवमेव नियोजितास्सङ्केताः । एते सर्वे शारीरक दशविधनादसम्बन्धिनः । तस्मादेव चित्रशिल्पस्य रेखाविन्यासविलासे लयबद्धगत्यात्मकसङ्गीतसञ्चारोस्तीति ख्यातानां चित्रकर्तृणां च सङ्गीतविमर्शकानांमतम् ।

चित्रीकृतरागानां च रागिणीनां स्वरलयभावगतीनाम् ।
रीतिर्नूतनरीत्या वर्णस्वरसामरस्यमाप्रतिफलति ।।१७।।

विशिष्टोयं संप्रदायः भारतीयानामेव । तदेव रागरागिणी चित्र-मालिका कल्पनम् । अनेन सङ्गीत-चित्रशिल्पयोर्मैत्री बहुधा स्पष्टीकृतापि । वर्णैः स्वरवर्णानां, रेखाभिर्लयगतिलास्यानां अभिव्यञ्जनमत्र कृतमन्या-दृशञ्च । रूपातीतान् श्रवणसुभगान् रागरागिणीसञ्चारान् सारूपायिता चित्रशिल्पमहिमाऽद्वितीया हि । काङ्ग्रा-पहाडी-राजस्थानी शैलिषु तथा कर्णाटक-तञ्जावूरू रीतिष्वपि यशस्वी अभिव्यक्तिः कृतैव । श्रवणसौख्यं नेत्रसौख्यजननद्वारा चित्तानन्ददायिनी भूतेऽयं परम्परा । एषापि खलु सङ्गीतशिल्पाद्वैतसाधिनी । किमुत ? एतावत्पर्यन्तमस्माभिर्विशदीकृत-सङ्गीतशिल्पाद्वैतगोपुरोपरि कलश इवान्ते उभयशास्त्रकलान्तर्गतस्य रसस्वरूपस्य लघुमीमांसा क्रियते ।

सहृदय हृदयतटाके त्रिभावसंयोगहेतुना रसकमलम् ।
सङ्गीतशिल्परविशशि किरणैर्विकसति विडम्बयन्नजसृष्टिम्
।।१८।।

विभावानुभावव्यभिचारिभावसंयोगाद्रसनिष्पत्तिरित्याह भगवान् भरतः । सूत्रस्यास्यानुसारं नैसर्गिका स्थायीभावाः पूर्वे हि सहृदयहृदये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुस्थिताः । सुयोग्यशिल्पदर्शनादेव तस्मिन्प्रकटितानुभावप्रचोदिताः च तत्परिवेष्टनालङ्कारविकारविन्यासादिभिश्च पूर्वसंस्कारकथास्मरणादि-सञ्चारीभावश्रीमन्तः रसोत्पत्तिहेतवः भवन्ति। रतिमिथुनशिल्पेषु शृङ्गारः, भूतवेतालादिषु भीभत्स भयानकौ, समरोन्मुखेषु योद्धशिल्पेषु वीरः, भगवत्प्रतिमासु शान्त-भक्तीत्यादयः संभवन्ति । सङ्गीतेऽपि शिल्पवत् श्रोतृसहृदयस्थान् विभावान् संचोदयन्, संवादयन् स्वरेषु विलसितानुभावा-श्च साहित्य-पार्श्ववाद्य-सङ्गीतमेलनादिसञ्चारीभावाः मिलित्वा रस-व्यञ्जकाः भवन्ति। षड्जे शान्तः, रौद्रश्च, पञ्चमऋषभयोः शृङ्गारः, इत्यादयः बीजरूपे सन्तीति विदितमेव। मानवे आदावेव समाविष्टाः समस्ताः मूलभावतरङ्गाः । तान् संवादयन्यदि प्रकृतिचोदिताः बहिः प्रेरकाः सुसदृशाः तरङ्गाः स्पन्दन्ते तर्हि पुरुषस्थाश्च; प्रकृतिभूता अपि मिलित्वा अनुरणनपराः उपबृंहिताः भवन्ति । अनेनालौकिकेन कर्मणा हि रसोत्पत्ति-श्च सिद्धिश्च । अत एव इत्थं सिद्ध्यते—समस्तशास्त्रकलाः एकस्मिन् मूले हि जाताः अनेकान् रञ्जयन् एकमेव प्रविशन्ति। प्रातिभासिके एकत्वस्याने-कत्वं च पारमार्थिके अनेकत्वस्यैकत्वं ध्वनन्तीति ।

सकलशास्त्रकलाकमलालया
विकलताऽकुलताकुलताकुलैः ।
विगतकल्पलताल्पविजल्पनं
मम तु पातु पुनातु पुनर्नवा ॥
गणेशसंज्ञितः कश्चिच्चापलाय प्रचोदितः ।
चारुचेलं तु कल्प्येदं चचाराचारुचोवरम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रमात्व परिष्कारः

किं नाम प्रमात्वमित्यत्र विवदन्ते दार्शनिकाः। प्राचीना उदयनादयः यथार्थानुभवत्वं प्रमात्वमिति वदन्ति। तल्लक्षणं मीमांसकैः कैश्चित् वेदान्तिभिश्च नाङ्गीक्रियते। नैयायिकानां समयेऽपि यथार्थानुभवत्वरूपप्रमालक्षणाङ्गीकारेऽपि यथार्थत्वं किं रूपमित्यत्रास्ति विवादः। उदयनाचार्यः मितिः सम्यक् परिच्छितिः, समीचीनो ह्यनुभवः प्रमेति ग्रन्थाभ्यां यथार्थत्वं सम्यक्त्व रूपमिति प्रतिपादयति। प्रमाणमञ्जर्यामपि सम्यगनुभूतिः प्रमेति स्वीकृतम्। परन्तु यथार्थ शब्दार्थस्य यथाश्रुतस्यालोचने क्रियमाणे लक्षणं कीदृशं भवतीति विचार्यते।

तथाहि अत्र यथा शब्दस्य सादृश्यमर्थो यदि विवक्ष्यते, तदा यथाऽर्थो घटो हि भवति, तथा ज्ञानं यदि भवेत् तदा प्रमाशब्दार्थतां भजत इत्यर्थो लभ्यते। एवं सति निरुक्त यथार्थत्वस्य कुत्रापि समन्वयो न स्यात्, घटादिनाऽर्थेन ज्ञानस्य सादृश्याभावात्। यदि येन केनापि रूपेण सादृश्यं विवक्ष्येत, तदा भ्रमात्मक ज्ञानस्यापि स्वविषयेण घटादिना प्रमेयत्वादि रूपेण सदृशत्वात् भ्रमस्यापि यथार्थत्वापत्तिः। अतोऽयं प्रकार आश्रयणीयः। थाल् प्रत्ययस्य प्रकारार्थत्वात् यद्रूपविशिष्टोऽर्थः, तद्रूपविशिष्ट विषयकत्वं ज्ञानस्य यथार्थत्वम्। अर्थात् यद्रूपविशिष्टोऽर्थः, तद्रूपवेषेण तस्य ज्ञाने भाने सति तज्ज्ञानस्य याथार्थ्यम् इति। एवं सत्यपि सर्वं ज्ञानं धर्मिण्यभ्रान्तम् प्रकारे तु विपर्ययः इति न्यायेन शुक्तौ इदं रजतमिति ज्ञानेऽपि इदन्त्वांशे यद्रूपविशिष्टो योऽर्थः इत्यादि लक्षणस्य संभवात्, भ्रमात्मके तस्मिन् अतिव्याप्तिः स्यात्। अतः सर्वांशे सादृश्यं विवक्षणीयम्। पूर्वोक्त निर्वचनानुसारेणैव तद्वति तत्प्रकारकोऽनुभव प्रमा इति नव्यनैयायिकग्रन्थः समजनि। तल्लक्षणानुसारेण सर्वांशे सादृश्यविवक्षायामेव लक्षणं भवेत्। यद्यद्रूपविशिष्टो यो योऽर्थः तत्तद्रूपवेषेण तस्य तस्यार्थस्य ज्ञाने भानं ज्ञाननिष्ठं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यथार्थत्वम् इति । अथवा यद्यद्रूप विशिष्टतया यस्य यस्यार्थस्य ज्ञाने भानम् तस्य तस्यार्थस्य तत्तद्रूपविशिष्टतायां सत्यां तज्ज्ञानस्य प्रमात्वं भवतीति । नचाननुगमः, स्वीयप्रकारता व्यापकाधेयताश्रयवस्तुविशिष्ट विषयकत्वं ज्ञानस्य यथार्थत्वमिति वर्णनात् । रजते इदं रजतमिति प्रमायां तदीय प्रकारताया इदन्त्वे रजतत्वे च सत्त्वात्, तन्निष्ठाधेयताश्रय वस्तुरूप इदन्त्वादि विशिष्ट रजनविषयकत्वस्य सत्त्वात् च लक्षणसमन्वयः । सर्वांशे यथार्थत्व मित्यस्याप्ययमेवार्थः । तस्य यथाश्रुतार्थवर्णनं तु न कर्तुं शक्यम्, प्रमात्वस्य व्याप्यवृत्तित्वात् । किञ्च व्यवहारानुसारेण ज्ञानयाथार्थ्यस्या-व्याप्यवृत्तित्व स्वीकारेऽपि, अत्र अंशस्य विषय रूपत्वात्, सर्वेष्वप्यर्थेषु यथार्थत्व मित्युक्तौ अस्मदुक्तार्थ एव पर्यवसानम् ।

परमतानुसारेण याथार्थ्य परिशीलनम् :

उदयनोक्तस्य याथार्थ्यस्या स्वीकारेण इतरे दार्शनिकाः अन्यथा प्रमालक्षणं व्याचक्रुः । मीमांसकाः ज्ञानगतं प्रामाण्यमपरिष्कुर्वन्तः अर्थतथा-त्वं प्रामाण्यमिति विषयगतं प्रमात्वं निरवोचन् । इतरेषां तु याथार्थ्य निर्वचनान्यत्र न विचार्यन्ते । परन्तु उदयनस्योपरि समारोपिता दोषा अत्र परिशील्यन्ते । एवं हि परैरुक्तम्—'संयक् परिच्छितिः' प्रमेत्युक्तौ किं नाम संयक्त्वम् ? यदि सम्यक्त्वमत्र कार्त्स्न्यम्—तदा विकल्पः क्रियते । कार्त्स्न्यमत्र सर्वावयव साहित्यम् ? उत सर्वधर्मविशिष्टत्वम् ? इति । यदि सर्वावयव -सहितत्वेन ज्ञानमेव प्रमेत्युच्यते, तदा पर्वतोवह्निमान् इति प्रत्यक्षे एवा-व्याप्तिः, परभागस्य तत्रादर्शनात् । किञ्च जातिः मेया इत्याकारक प्रमायामव्याप्तिः, तत्र जातेः निरवयवत्वेन, सर्वावयव सहितत्वेन ज्ञाना-भावात् । यदि सर्वधर्मविशिष्टतया ज्ञानं प्रमेत्युच्यते, तदाऽपि दोषस्तदव-स्थः । अस्मिन् पक्षे कस्यापि वस्तुनः सर्वधर्मविशिष्टतया ज्ञानस्यासर्वज्ञे-ऽसंभवात्, ईश्वरीय प्रमायामेव लक्षणसमन्वयो भवेत् इति दोषः । यदि यथार्थत्वं नाम अबाधित विषयत्वं इत्युच्यते तदा रजत एव यदि इदं रजत-मिति प्रत्ययो जायते, तत्रैव परस्तात् कदाचित् नेदं रजतमिति बाधक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्ययस्य संभवात् अव्याप्तिः स्यात् । भ्रमस्यापि नेदं रजतमिति ज्ञानस्याप्रामाण्यज्ञानानास्कन्दितत्वे बाधकत्वाहानात् । किञ्च प्रमाया एव-बाधकत्वमिति यद्याग्रहः, तदा बाधस्य विपरीत प्रमारूपत्वेनान्योन्याश्रय-दोषो जागर्ति, बाधलक्षणे ज्ञाते अबाधित विषयत्व रूप प्रमात्व घटक याथार्थ्य धीः, तद्रूपे ज्ञाते विपरीत प्रमारूप बाधधीरिति । आत्माश्रयो वा ।

न्याय चन्द्रिकायाम् यथार्थत्वं बहुधा विकल्प्य दूषितम् । प्राधान्येन यथार्थत्वम् नाम तत्वविषयत्वं, सम्यक्त्वम्, अव्यभिचारित्वम् अविसंवादित्वम्, अबाधितत्व मित्येतेकल्पाः प्रदर्शिताः । तत्वविषयत्वम् प्रमात्वमिति पक्षे भ्रमे ऽतिव्याप्तिः प्रदर्शिता । भ्रमे विषयीभूतस्य वस्तुनोऽपि तत्त्वरूपत्वात् । नहि शुक्तौ रजतमिति धियां विषयीभूतस्य रजतत्वस्यातत्त्वरूपता । अन्यथा शशश्रृङ्गतुल्यतापत्तेः । सम्यक्त्वमिति पक्षः पूर्वमेव विकल्प्य खण्डितः । अव्यभिचारो यदि यथार्थत्वमुच्यते, तदा विषयेण साकमेकदेशवृत्तित्वेऽव्यभिचार विवक्षायाम् घटादि ज्ञानेऽव्याप्तिः घटस्य भूतलनिष्ठत्वात्, ज्ञानस्य चात्मनिष्ठत्वात् । एककालवृत्तित्वेऽव्यभिचारविवक्षायामतीतार्थविषयकानुमितौ लक्षणासमन्वयः । अविसंवादित्वमिति पक्षे धारावगाहिभ्रमेऽतिव्याप्तिः । तत्रापि ज्ञानान्तरेण पूर्वज्ञाने यथोल्लिखितम्, तथोल्लेख्यमानात्, तस्यैवाविसंवादित्वरूपत्वात् । अतः सोऽपि पक्षः त्याज्यः । अबाधितत्वं प्रमात्वमित्युक्तौ भ्रमेऽतिव्याप्तिः, भ्रमस्योत्पत्तिकाले तस्य बाधाभावात् । तथा च यथार्थत्वं न कथञ्चित् दुर्वचम् । अतस्तद्घटितं लक्षणं न स्वीकार्यमिति प्रत्यपादि न्यायचन्द्रिकायाम् ।

न्यायचन्द्रिकोक्त दूषणपरिहारः

न्यायचन्द्रिकोक्तदूषणानि यथार्थत्वस्यान्यथानिर्वचन प्रयुक्तानि । "[1]यत्र यदस्ति तत्र तस्यानुभवः प्रमेति, तद्वति तत्प्रकारकोऽनुभवः इति

न्या. चन्द्रिका—P-३८२
Madras Government Oriental Series.
१. त. चि. ४३६ P. No

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चोक्तयोः मणिकार लक्षणयोरेते दोषा न संभवन्ति। उदयनाचार्यस्यापि एतादृशार्थवर्णने नास्ति दृष्टिः। अत एवान्यत्र वदति यत्र यन्नास्ति तत्र तस्यावगतिरिति भ्रान्त्यर्थत्वात्। एतदालम्बनस्य चैवमुल्लिखतः सर्वत्र यथार्थत्वादिति। तेन ज्ञायते—उदयनाचार्यस्यापि तदभाववति तत्प्रकारकत्वमयथार्थत्वम्। तद्वति तत्प्रकारकत्वं यथार्थत्वमिति प्रतिपादन एव तात्पर्यमिति। अतः उक्तदोषाः परिहृताः।

प्राचीनमेकं लक्षणम्

अनधिगतार्थगन्तृत्वं प्रमात्वमिति बहवः प्राचीनाः। तेषां तु अनधिगत पदेन स्मृते र्व्यावृत्तिरिष्टा। परन्तु धारावगाहिज्ञानेषु द्वितीयादि ज्ञानेऽव्याप्तिः तन्मते। द्वितीयादि ज्ञानस्य प्रथमज्ञानगृहीतार्थग्राहित्वात्। एवमनधिगतार्थगन्तृत्वस्य विपर्ययेऽपि सत्वात् विपर्ययस्यापि प्रमात्व प्रसङ्गः। धारावगाहि ज्ञानेषु पूर्वं पूर्वं ज्ञानेऽविषयः क्षणविशेष उत्तरोत्तर ज्ञानेषु विषयो भवति, अतो न द्वितीयादि ज्ञानानां याथार्थ्याभावप्रसङ्ग इति एतद्लक्षण कर्तृणामाशयः। परन्तु कालस्यातीन्द्रियत्वात्क्षणविशेषस्य ज्ञानं न भवेत्। इत्यादिकं सर्वमभिप्रेत्य न्यायकुसुमाञ्जलौ आचार्यः—

अव्याप्तेरधिक व्याप्ते रलक्षण मपूर्वदृक्।

यथार्थानुभवो मान मनपेक्षतयेष्यते।

इति ग्रन्थेन यथार्थानुभवत्वं प्रमात्वमिति निष्कर्षयति।

प्रमात्वस्य जातित्व निरासः

उदयनाचार्यस्य यद्यपि याथार्थ्यं तद्वतितत्प्रकारकत्वमेव सम्मतम्। परन्तु कण्ठत एवं न तेन परिष्कृतम्। समीचीनोह्यनुभवः प्रमेति कथितम्। संयक्त्वं कीदृशमिति न निरुक्तम्। अत एवं प्रश्न उदेति—प्रमात्वं जातिरेव भवतु, तथा सति निर्वचन सापेक्षता न स्यादिति। तन्न युज्यते—प्रमात्वं यदि जातिः स्यात्, तदा ज्ञानस्य योग्यपदार्थवृत्तित्वात् योग्य व्यक्ति वृत्तिजातेः प्रत्यक्षत्वनियमात् प्रत्यक्षत्वप्रसङ्गः। न चेष्यत एव

---

२. न्या. कुसुमाञ्जलिः P. २७६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राभाकर मत इव प्रमात्वस्य प्रत्यक्षता ज्ञानेन सहेति वाच्यम्, तथा सति घटादि ज्ञानानन्तरं तज्ज्ञान धर्मिक प्रमात्व संशयानुपपत्तेः। अयं दोषः प्रमात्वस्य स्वतोग्राह्यत्व वादिनां मते नैयायिकोक्त एव। किञ्च प्रमात्वस्य जातित्वे प्रत्यक्षत्वादिना सङ्करः स्यात्, प्रत्यक्षत्वे विहाय प्रमात्वं अनुमित्यात्मक प्रमायां, प्रमात्वे विहाय प्रत्यक्षत्वं प्रत्यक्षात्मकभ्रमे, उभयोः समावेशः प्रत्यक्ष प्रमायाम् इति। किञ्च प्रमात्वस्य जातित्वे जातेः व्याप्यवृत्तित्वनियमात् भ्रमस्यांशे प्रमात्वं दुर्वचं स्यात्। विशेष्यावृत्त्यप्रकारकत्वम्—अवच्छेदकम्, तदवच्छेदेन प्रमात्वं वर्तत एव, प्रमात्वस्य जातित्वेऽपि अव्याप्यवृत्तित्वं स्वीक्रियत एवेति तु न शङ्क्यम्, लाघवात् विशेष्यावृत्त्यप्रकारकत्वस्यैव प्रमात्वरूपत्वौचित्यात्।

विशेष्यावृत्त्यप्रकारकत्वस्य यथार्थत्वरूपत्व खण्डनम्

चिन्तामणिकारो गङ्गेशोपाध्यायः विशेष्यावृत्त्यप्रकारकत्वं प्रमात्वमिति नाङ्गीकरोति। तथासति एकविशेष्यकानुभवे लक्षणसमन्वय संभवेऽपि समूहालम्बनविशेषे प्रमारूपेऽव्याप्ति मन्यते। तथाहि—एकैकविशेष्याव्यावृत्ति नाना प्रकारक समूहालम्बनप्रमायामव्याप्तिः। घटः पटश्चेति तादृश समहालाम्बन-प्रमाकारः। तदर्थं यावद्विशेष्यावृत्त्यप्रकारकत्वं यदि विवक्ष्यते, तदा उक्तस्थले घटत्व पटत्वयोः प्रत्येकं यावदन्तर्गत घटपटयोः सत्त्वात् यावद्विशेष्यावृत्ति मठत्वाद्येव, तदप्रकारकत्वस्योक्त ज्ञाने सत्वाल्लक्षण समन्वयः। एवं सति यावत्त्वस्य अनेकत्वे सति अशेषत्व रूप साकल्यार्थत्वेन एकमात्र विशेष्यक प्रमायां यावद्विशेष्यघटित प्रमात्वपरिष्काराभावात् अव्याप्तिर्भवेत्।

मणिकारस्याभिमतं लक्षणम् "तद्वति तत्प्रकारकत्वे सति अनुभवत्वम् इत्येव। एतल्लक्षणम् नवीनैः बहुधा परिष्कृतम् दृश्यते। तद्वन्निष्ठविशेष्यता निरूपित तन्निष्ठ प्रकारताशाल्यनुभवत्वम् इति सामान्यतो लभ्यते। तदभाववन्निष्ठ विशेष्यतानिरूपित तन्निष्ठप्रकारता शाल्यनुभवत्वम् भ्रमत्वम्। एवं सति वृक्षः कपिसम्योगीति ज्ञानस्य प्रमात्वं भ्रमत्वं च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्यादिति शङ्कायामवच्छेदकस्यापि लक्षणे निवेशेन प्रमात्व संपादनं कार्यम्। निर्विकल्पके च लक्षणसमन्वयाभाव इष्ट एव, व्यवहारनङ्गस्य तस्य प्रमात्वानभ्युपगमात्। अस्य च लक्षणस्य एवं निष्कर्षः गङ्गारामीये[1]—स्वसमानाधिकरणाभाव प्रतियोगितावच्छेदकावच्छिन्नभिन्न स्वसमानाधिकरणाभावीय यद्यत्संबन्धावच्छिन्नप्रतियोगितानवच्छेदक धर्मव्यापिका सती तत्तत्संबन्धावच्छिन्ना या या प्रकारता तदन्य तन्निष्ठप्रकारता शालित्वम् अयथार्थत्वम्। तादृशप्रकारत्वा निरूपकत्वम् यथार्थत्वमिति।

प्रमात्वस्य गदाधरीयः परिष्कारः

गदाधर भट्टाचार्यः तद्वति तत्प्रकारकत्वरूपं प्रमात्वं इदं रजतमिति भ्रम एवातिव्याप्तं भवति, यतः तत्र इदन्त्ववति इदन्त्व प्रकारकत्वं वर्तत एवेति मन्यमानः सर्वांशे प्रमात्वं "[2]स्वव्यधिकरण प्रकारावच्छिन्ना या या विशेष्यता तत्तदनिरूपकत्वम् इति लक्षितवान्। इदं रजतमिति भ्रमे इदन्त्ववति इदन्त्वप्रकारकत्वसत्त्वेऽपि इदमर्थनिष्ठ विशेष्यताव्यधिकरण रजतत्व रूप प्रकारावच्छिन्ना इदमर्थ विशेष्यता, तन्निरूपकत्वं च भवति, न तु तदनिरूपकत्वमिति नातिव्याप्तिः। अस्य च निष्कर्ष एवमभाणि बलदेव भट्टाचार्येण[3]विशेष्यता विशिष्ट प्रकारत्वानिरूपकत्वम् सर्वांशे प्रमात्वम्। प्रकारतायां विशेष्यतावैशिष्ट्यं च स्वनिरूपितत्व, स्वाश्रय निष्ठाधिकरणता निरूपिताधेयतावदन्यत्व उभय संबन्धेन, आधेयतावत्वं च स्वावच्छेदसंबन्धा-वच्छिन्नत्व, स्वानवच्छेदकानवच्छिन्नत्व, स्वसामानाधिकरण्य, स्ववृत्तित्व-एतच्चतुष्टय संबन्धेन,, स्ववृत्तिवं च स्वानवच्छेदकानवच्छिन्नत्व, संबन्धेनेति। अस्य लक्षणस्योपरि विचारः अत्रानावश्यकः, बलदेवीय एव विस्तरेणकृतश्च।

प्रकृत लेखोद्देशः

अस्माकं तु विशेष्यावृत्त्यप्रकारकत्वम् यथार्थत्वमिति लघुभूतं

१. गङ्गारामजटीयम् पृष्ठ ८७८
२. सामान्यनिरुक्ति,
३. बलदेवीयम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिभाति । तदनुसारेण तल्लक्षणं परिष्कुर्मः । विशेष्यावृत्त्यप्रकारकत्वे सत्त्यनुभवत्वं प्रमात्वम् । अर्थात् विशेष्यावृत्तिप्रकारकत्वे सत्त्यनुभवत्वं भ्रमत्वमिति फलति। तादृश भ्रमभिन्नत्वं सर्वांशे प्रमात्वम् । तदर्थमिदानीं भ्रमलक्षणं परिष्क्रियते ।

उक्तलक्षणस्य परिष्कारः

विशेष्यावृत्तिप्रकारकत्वं नाम विशेष्य वृत्तित्वाभाववन्निष्ठप्रकारताकत्वम् । एवँ सति एकैक विशेष्यावृत्तिनानाप्रकारक समूहालम्बन प्रमायां भ्रमलक्षणस्यातिव्याप्तिः, घटः पटश्चेति समूहालम्बन प्रमायां घटरूपविशेष्यावृत्ति पटत्वात्मक प्रकारवत्त्वस्य सत्त्वात् । तदर्थमुक्तरीत्या यावद्विशेष्यावृत्ति प्रकारकत्वस्य विवक्षणे शुक्तौ इदं रजतमिति भ्रमेऽव्याप्तिः, साकल्यापरपर्याय यावत्त्वस्य तत्र विशेष्येऽभावात् । किञ्च विशेष्यत्वस्य केवलान्वयित्वात् यावद् विशेष्य वृत्तित्वस्य कुत्राप्यसंभवः । यावद्विशेष्यताश्रयवृत्तित्व निवेशेऽपि तद्दोषः स्यादेव । तदर्थमेवं वक्तव्यम्—स्वीयविशेष्यताश्रयवृत्तित्वाभाववन्निष्ठप्रकारताकत्वमिति । एवं सति स्वत्त्वघटितत्वेनाननुगमः संभवति । एवमनुगमः कार्यः प्रकारता विशिष्ट प्रकारताकानुभवत्वं भ्रमत्वम् । वैशिष्ट्यं च स्वतादात्म्य स्वनिरूपित विशष्यताश्रय वृत्तित्वाभाव सामानाधिकरण्य—एतदुभयसंबन्धेन । घटः पटश्चेत्युक्त समूहालम्बन प्रमायां घटत्वनिष्ठ प्रकारतायां स्वनिरूपित घटनिष्ठविशेष्यताश्रय घट वृत्तित्वाभाव सामानाधिकरण्याभावात् नातिव्याप्तिः । अत्रानुगमे तादात्म्य रूप प्रथमसंबन्धनिवेशाभावे शुक्तौ इदं रजतमिति भ्रमेऽव्याप्तिः, रजतत्वनिष्ठप्रकारता निरूपित शुक्ति निष्ठ विशेष्यताश्रयवृत्तित्वाभाव सामानाधिकरण्यस्य इदन्त्व निष्ठ प्रकारतायामसत्त्वात् । अतः प्रकारतायां प्रकारतातादात्म्य निवेशः, तथा चोक्तस्थले इदन्त्वनिष्ठप्रकारता—रजतत्व निष्ठ प्रकारतयोश्च भेदात् न दोषः । अत्र वृत्तित्वं प्रकारतावच्छेदक संबन्धेन वक्तव्यम् । अन्यथा इदं रजतमिति भ्रमेऽव्याप्तिः । रजतत्वनिष्ठप्रकारता निरूपित विशेष्यताश्रय शुक्ति वृत्तित्वस्य कालिकसंबन्धेन रजतत्वे सत्वात् तदभाव सामानाधि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

करण्यस्य रजतत्व निष्ठप्रकारतायामभावात् । प्रकारतावच्छेदकसम्बन्धेन वृत्तित्व निवेशे उक्तस्थले तादृशेन समवायेन संबन्धेन शुक्ति वृत्तित्वस्य रजतत्वेऽभावान्न दोषः । प्रकारतावच्छेदक सम्बन्धावच्छिन्न वृत्तित्वाभावस्य निवेशे जातिः-सत्तावतीत्यस्मिन् भ्रमेऽव्याप्तिः, तत्र सत्ता प्रकारता निरूपित विशेष्यताश्रयजाति निरूपित प्रकारतावच्छेदक समवाय संबन्धावाच्छिन्न वृत्तित्वस्याप्रसिद्ध्या तादृश वृत्तित्व घटितलक्षणासंभवात् । तदर्थं स्वनिरूपित विशेष्यताश्रय वृत्तित्व प्रकारतावच्छेदक संबन्धा विच्छन्नवृत्तित्वो भयाभाव सामानाधिकरण्यं प्रकारतायां निवेश्यम् । उक्तस्थले जाति वृत्तित्वस्य, समवाय सम्बन्धावच्छिन्न वृत्तित्वस्य चान्यत्र प्रत्येकं प्रसिद्धयोरभावस्यात्रसत्तायां प्रसिद्धिसंभवेन दोषाभावात् । न च लाघवात् स्वनिरूपित विशेष्यताश्रयनिरूपितत्व, प्रकारतावच्छेदक संबन्धावच्छिन्नत्वो भयाभाव वद्वृत्तित्व सामानाधिकरण्यमेव निवेश्यतामिति वाच्यम्, तथासति गगनवान् घट इति भ्रमेऽव्याप्तेः । तत्र घटनिरूपितत्वस्य, सम्योगसंबन्धावच्छिन्नत्वोभयाभावस्य वृत्तित्वे प्रसिद्धावपि, वृत्तित्वस्य गगनेऽभावात्, तन्निष्ठ प्रकारतायां वृत्तित्व सामानाधिकरण्यस्य वक्तुमशक्यत्वात् । अतः गुरुभूतोऽपि प्रकारताधर्मिक वृत्तित्वद्वयाभाव सामानाधिकरण्य कल्प एव निवेशनीयः । न चैवँ सति रूपवद्भूतलं संयोगेन सत्तावदिति भ्रमेऽव्याप्तिः, तत्र सत्तायां स्वनिष्ठप्रकारतानिरूपित विशेष्यताश्रय भूतलनिरूपित वृत्तित्वस्य प्रकारतावच्छेदक समवाय संबन्धावच्छिन्न वृत्तित्वस्य च सत्त्वादिति वाच्यम्, प्रकारताविशिष्ट प्रकारताकानुभवत्वं प्रमात्वमिति परिष्करणात् । वैशिष्ट्यं च स्वतादात्म्य स्वनिरूपित विशेष्यताश्रय वृत्तित्व-स्वावच्छेदक सम्बन्धावच्छिन्नवृत्तित्वोभयाभावसामानाधिकरण्योभयसंबन्धेन ।

अत्र वृत्तित्वद्वयस्य सम्योगादि व्यधिकरण संबन्धेना भावमादाय प्रमाया मतिव्याप्ति वारणायवृत्तित्वद्वयनिष्ठ प्रतियोगितायां स्वरूपसम्बन्धावच्छिन्नत्व निवेशः । न च इदं रजतमिति प्रमायामति व्याप्तिः, तत्र रजतत्वनिष्ठ प्रकारतायां रजतनिष्ठ विशेष्यताश्रय रजतनिरूपित वृत्तित्वस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृत्तित्वत्व घटत्वो भाभ्यामभावस्य रजतत्वे सत्वात्, तन्निष्ठप्रकारतायां तादृशोभयाभाव सामानाधिकरण्य सत्वादिति वाच्यम्, तादृश वृतित्वत्वेतर-धर्माविशिष्ट, तादृशसँबन्धावच्छिन्न वृतित्वोभयाभावस्यैव निवेश्यत्वात्। न चैवं सतितादृशोभयाभावस्य रजतत्वादौ कालिकादि संबन्धेन सत्वात् इदं रजतमित्यादि प्रमायामतिव्याप्तिरिति वाच्यम्, सामानाधिकरण्यघटका भाववत्वस्य स्वरूप संबन्धेन, विरोधिताग्रह नियामक संबन्धेन वा निवेशात्। अभाव सामानाधिकरण्यघटकवृत्तित्वांशोऽपि स्वरूपसंबन्धेन निवेश्यः। न चैवमपि पृथिवीजलोभयं गन्धवदिति भ्रमेऽव्याप्तिः, गन्धनिष्ठप्रकारतायां प्रकारतावच्छेदकसमवायसंबन्धावच्छिन्न वृत्तित्व, स्वनिरूपित विशेष्य-ताश्रय पृथिवीनिरूपितवृत्तित्वोभय सामानाधिकरण्यस्यैव सत्वात् इति वाच्यम् स्वनिरूपित विशेष्यताश्रय यावन्निरूपितवृत्तित्वस्यैव लक्षणे घटकत्वात्। तथाचोक्त स्थले विशेष्यताश्रययावन्निरूपितवृत्तित्वस्य गन्धेऽभावान्न दोषः, यावदन्तर्गत जले गन्धाभावात्। न चैवमपि यावत्त्वस्य साकल्य रूपत्वे 'इदंरजतमिति भ्रमे यत्र साकल्यं विशेष्यताश्रयेऽप्रसिद्धम्, तत्राव्याप्तिः, व्यापकत्व रूपस्य साकल्यस्य विवक्षणात्। तथाच स्वनिरूपित विशेष्यता व्यापकाधिकरणतानिरूपित वृत्तित्वघटितोभया-भावस्य निवेशोऽत्र विवक्षितः। उक्तस्थले गन्धाधिकरणतायाः पृथिवी जलोभयत्वावच्छिन्न विशेष्यता व्यापकत्वाभावात् द्रव्यताद्यधिकरणता-मादाय द्रव्यत्वादौ तादृशवृत्तित्वस्य प्रसिद्धि संपादनेन, तादृश वृत्तित्व घटितोभयाभावस्य गन्धे संभवः। एतच्च विशेष्यत्वादीना मतिरिक्तत्व सिद्धान्तानुसारेण। यदि पृथिवीजलोभयं गन्धवदितिज्ञाने विशेष्यता विशेष्य भेवेन भिन्नाऽभ्युपगम्यते, तदा स्वनिरूपित विशेष्यतात्वावच्छिन्न व्यापक-त्वम् विवक्षणीयम्। न चैतस्मिन् लक्षणे पर्वतो वह्निमान् इति प्रमाया-मतिव्याप्तिः, सम्योग सम्बन्धेन वह्नेरव्याप्यवृत्तित्वमिव वह्निनिष्ठ संयोग सम्बन्धावच्छिन्नवृत्तितायां अपि प्रादेशिकत्वमिति स्वीकारात् पर्वत निष्ठविशेष्यता निरूपित वृत्तित्वस्य अत्रदेशावच्छेदेनाभावस्य वह्नौ सत्वा-दिति वाच्यम्, तादृशोभयाभावे प्रतियोगिवैयधिकरण्यस्य देयत्वात्। प्रति-योगिवैयधिकरण्यमपि प्रतियोगितावच्छेदकावच्छिन्न वैयधिकरण्यरूपं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाच्यम्, अन्यथा सर्वत्र भ्रमे रजतत्वादि प्रकारनिष्ठवृत्तित्वाभावस्य प्रमेयत्वेन रूपेण स्वप्रतियोगिवृत्तित्वसामानाधिकरण्यात्, असंभवः स्यात्। नचास्मिन् लक्षणे परिष्कारोऽपेक्ष्यत एव, यतः विशिष्ट सत्तावान् गुण इति भ्रमे एतल्लक्षणस्याव्याप्तिर्भवति, तत्रहि विशिष्ट शुद्धयोरैक्यात् तादृश विशेष्य ताश्रय वृत्तित्वाभावः (गुणवृत्तित्वाभावः) गुण कर्मान्यत्व विशिष्ट सत्तायां न संभवति, विशेष्यवृत्ति प्रतियोगिक विशिष्टानुयोगिकाभावस्याभ्युपगमादिति वाच्यम्, अस्माभिः तादृश विशेष्यता व्यापकाधिकरणता निरूपित वृत्तित्व घटितोभया भावस्यैव निवेशितत्वात्। तथाचोक्तस्थले विशिष्ट शुद्धयोरैक्येऽपि विशिष्टाधिकरणताया अतिरिक्तत्वात्, विशिष्ट निरूपिताधिकरणताया गुणेऽभावात्, अन्याधिकरणतामादाय लक्षणसमन्वय सम्भवः। न चैवमपि गुणकर्मान्यत्वविशिष्ट सत्तावान् गुण इति भ्रमस्थले तादृशविशेष्यताव्यापकत्वस्य शुद्ध सत्ताधिकरणतायां सत्त्वात्, तादृशाधिकरणतानिरूपित वृत्तित्वस्य सत्तायां सत्त्वे पूर्वोक्तरीत्या विशिष्ट सत्तायां तदभावो दुर्लभ एवेति वाच्यम्, स्वनिरूपित विशेष्यता व्यापकाधिकरणता निरूपित वृत्तितावच्छेदकावच्छिन्नवृत्तित्वत्व, घटितोभयाभावस्य लक्षणे निवेशात्। उक्तस्थले सत्तानिष्ठवृत्तित्वाभावस्य विशिष्ट सत्तायामभावेऽपि सत्तात्वस्यैव वृत्तितावच्छेदकत्वात्, तदवच्छिन्नत्वाभावस्य विशिष्टसत्तायां संभवः। नहिभवति विशिष्टसत्ता गुणवृत्तिरिति विशिष्ट सत्तात्वस्य गुण वृत्तितावच्छेदक त्वावगाहिनी प्रामाणिकी प्रतीतिः।

एवं सति लक्षणे सामानाधिकरण्यभागोव्यर्थः, स्वनिरूपित विशेष्यता व्यापकाधिकरणतानिरूपितवृत्तितावच्छेदक धर्मावच्छिन्नत्व, स्वावच्छेदक संबन्धावच्छिन्नत्वोभयाभावस्य प्रकारतायां निवेशेनैवोपपत्तेः। नचावच्छेदककोटि प्रविष्टाना मवछेदकत्वपक्षे दण्डविशिष्टभूतले दण्डिमद्भूतलमिति भ्रमो यत्र भवति (केवल पुरुषाधिकरणे) तत्राव्याप्तिः, तत्र पुरुष निष्ठ प्रकारतायां सम्योग संबन्धावच्छिन्नत्व स्वनिष्ठ प्रकारता निरूपित भूतलनिष्ट विशेष्यता व्यापकाधिकरणताकवृत्तितावच्छेदक दण्डत्वावच्छिन्नत्वयोर्द्वयोरेव सत्त्वात्-इति वाच्यम्, अत्रावच्छिन्नत्वस्य साक्षादवच्छेदकतानिरूपकत्व रूपस्यैव स्वीकारात्। वृत्तितावच्छेदकावच्छिन्नत्वं प्रकारतायां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृत्तितावच्छेदक निष्ठावच्छेदकता निरूपकत्वे सति वृत्तितावच्छेदकता निरूपितावच्छेद्यत्व समानाधिकरणावच्छेदकत्वा निरूपकत्वम् ।

उक्तस्थले च प्रकारतायाः दण्डत्वेन साक्षादवच्छिन्नत्वाभावान्न-दोषः । न च गुरुधर्मस्याधेयतावच्छेदकत्वं संभवति लघधर्मे तादृशि न स्वीक्रियते, एवं च प्रमेयघटवद्भूतलमिति प्रमायामति व्याप्तिः, तत्र प्रमेय-घटत्वस्य वृत्तित्वावच्छेदक त्वाभावात्, वृत्तितावच्छेदक-अन्यधर्मावच्छिन्न-त्वस्य प्रमेयघटनिष्ठप्रकारतायामभावात् इतिवाच्यम्, तत्र लघुभूतं घटत्वमादायाऽपि दोष वारणसंभवात् । शुद्ध घटत्वावच्छिन्नत्वस्य प्रमेय घटत्वावच्छिन्न प्रकारतायामपि संभवात् । प्रकारतायाः गुरुधर्मावच्छिन्न-त्वं त्विष्टमेव । गुरु धर्मस्यापि विषयतावच्छेदक त्वस्य सिद्धान्त लक्षण गादाधर्यां स्पष्टीकृतत्वात् । न चैवं सति चत्वरीयवह्निमन्महानसम् इति प्रमेऽव्याप्तिः, तत्रापि महानसनिष्ठविशेष्यताश्रयनिष्ठाधिकरणता निरूपित वृत्तितावच्छेदक वह्नित्वावच्छिन्नत्वस्य चत्वरीय वह्नि निष्ठप्रकारतायां सत्वात् । न च तत्र महानसीयत्व विशिष्ट वह्नित्वमेव वृत्तितावच्छेदकं न शुद्धं वह्नित्व मित्यत्र किञ्चित् प्रमाणमस्ति, अन्यथा प्रमेयत्वादेरपि वृत्ति-तावच्छेदक घटक त्वापत्तिरिति वाच्यम्, अवच्छिन्नत्वस्य व्यापकत्व रूपस्य विवक्षणात्, उक्तस्थले वह्नित्वस्य वृत्तितावच्छेदकत्वेऽपि तद्व्यापकत्वस्य चत्वरीय वह्निप्रकारतायां सत्वान्न दोषः । प्रमेय घटवद्भूतल मित्यत्र तादृश वृत्तितावच्छेदक घटत्वव्यापकत्वस्य प्रमेयघटत्वावच्छिन्न प्रकारतायाः सत्त्वात्, न प्रमाभूत ज्ञानेऽतिव्याप्तिः । एवं च यत्र स्वरूपतः रजतत्त्वं रजतेभासते इदंरजत 'मित्याकारक ज्ञाने तत्र रजत वृत्तितावच्छेदकस्य रजतत्वत्वस्य प्रसिद्धावपि, तदवच्छिन्नत्वं रजतत्वनिष्ठप्रकारतायां नास्तीति तादृशप्रमायामतिव्याप्तिरिति दोषोऽपि प्रत्युक्तः । तादृश वृत्तितावच्छेदक व्यापकत्वस्य रजतत्व निष्ठप्रकारतायामबाधितत्वात् ।

प्रकारतावच्छेदक संवन्धावच्छिन्नत्वं प्रकारतायां प्रकारतावच्छेदक संबन्धेतर संबन्धानवच्छिन्नत्वे सति प्रकारकतावच्छेदकसंवन्धावच्छिन्न-

१. सि. लक्षणम्—गदाधरीयम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वम् । अन्यथा पर्वतः (सम्योगेन) वह्निमान् इतिप्रमाया मतिव्याप्तिः वह्नि-निष्ठप्रकारतायां पर्वतनिरूपित वृत्तितावच्छेदकावच्छिन्नत्व सत्वेऽपि महानसानुयोगिकत्व विशिष्टसंयोग सम्बन्धानवच्छिन्नत्वात् उभयाभाव प्रसक्तेः । सत्यन्तदलदानेतु महानसानुयोगिकत्वांशस्य प्रकारतावच्छेदक संबन्धेतरत्वान्न दोषः । प्रमेयं गगनवदितिभ्रमे प्रमेय निरूपित वृत्तिताव-च्छेदक घटत्वावच्छिन्नत्व, सम्योग रूप प्रकारतावच्छेदक संबन्धावच्छिन्न-त्वोभयाभावस्य गगननिष्ठप्रकारतायां सत्त्वेन लक्षणसमन्वयः । प्रमेयं घटवदिति प्रमायामपि निरुक्तरीत्यैव लक्षण समन्वयः वक्तव्यः ।

न च घटे घट त्वमिति प्रमाया मतिव्याप्तिः, घटत्वस्य घटाधि-करणत्वाभावात् घटत्व निरूपित वृत्तितावच्छेदक घटत्वत्वावच्छिन्नत्व-प्रकारतावच्छेदकाधेयता सम्बन्धावच्छिन्नत्वोभयाभावस्य घट निष्ठप्रकार-तायां सत्त्वात् । न च घट निष्ठतद्व्यक्तित्वमपि आधेयतासंबन्धेन घट-त्वनिरूपित वृत्तितावच्छेदकमेवेति वाच्यम्, आधेयतादेर्वृत्यनियामक सम्बन्धत्वात्, तेन सम्बन्धेन वृत्तित्वस्याप्रामाणिकत्वादिति वाच्यम्, विशेष्यता व्यापक निरूपकताकसंबंधितावच्छेदकावच्छिन्नत्व घटित-लक्षणस्यैवेष्टत्वात् । न च तथासति यत्ररजतत्वे रजतस्य भ्रमः, तत्रा-व्याप्तिः, तत्र प्रकारतावच्छेदकसंबंधः समवायसंबंधः, तादृश समवाय संबन्धावच्छिन्न त्वस्य, रजतत्वनिष्ठ विशेष्यता व्यापक रजतत्व निष्ठ-निरूपकताकरजतनिष्ठसंबंधितावच्छेदक तद्व्यक्तित्वावच्छिन्नत्वस्य च रजत निष्ठ प्रकारतायां सत्वात् इति वाच्यम्, तत्र शुद्ध समवायस्य प्रका-रतावच्छेदक संबंधत्वात् । समवाय प्रतियोगिताया एव रजत संबंध-त्वात् । तथा च रजतनिष्ठप्रकारतावच्छेदकसंबन्धात्मकसमवायसम्बन्धा-वच्छिन्नवृत्तित्वस्य रजतेऽभावात् न दोषः । लक्षणेऽपि तदर्थं परिवर्तनं कार्यं स्वनिरूपित विशेष्यता व्यापक निरूपकताक संबन्धितावच्छेदका-वच्छिन्न वृत्तित्व, स्वावच्छेदक संबन्धावच्छिन्नवृत्तित्वोभयाभाव सामा-नाधिकरण्यस्य प्रकारतायां निवेशेन सर्वोपपत्तिः । उक्तस्थले रजतनिष्ठ प्रकारतायाः प्रकारतावच्छेदकीभूत समवाय सम्बन्धावच्छिन्नत्वेऽपि तदवच्छिन्नवृत्तित्व सामानाधिकरण्याभावात् न दोषः । न चैवं सति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आधेयता संबन्धावच्छिन्नवृत्तिताया अप्रसिद्धेः कथं घटे घटत्वमिति प्रमाया-मतिव्याप्ति वारणम् इति वाच्यम्। अभाव प्रतियोगि कोटावुभयत्र संबन्धिताया एव वृत्तित्व स्थाने निवेश्यत्वात्। तथा च गुरु भूतमपि सामानाधिकरण्य घटितमेव लक्षणं वक्तव्यम्।

तद्वतितत्प्रकारकत्वं यथार्थ त्वमिति पक्षे किञ्चिदंशे प्रमात्व मादाय शुक्तौ इदं रजतमिति भ्रमेऽतिव्याप्तिः, तदर्थं सर्वांशे यथार्थत्वं विव क्षणीयम्। तद्वदत्रापि स्वनिरूपितेत्यादि निर्वचने क्रियमाणे सर्वांशे प्रमात्व-लाभाय तादृशीयाया प्रकारता, तदनिरूपकत्वम् प्रमात्वमिति निष्कर्षः कार्यः।

अस्य लक्षणस्य (भ्रमलक्षणस्य) पृथिवी जलोभयं गन्धवदिति भ्रमेऽव्याप्तिः, तत्र स्वनिरूपित विशेष्यताव्यापकद्रव्यत्वावच्छिन्नाधि-करणता मादाय गन्धे तादृशाधिकरणता निरूपित वृत्तित्वस्यैव उपपाद-यितुं शक्यत्वात्। तदर्थं विशेष्यता समनैयत्यं निरूपकतायामधि करणतायां वा निवेश्यम्। द्रव्यत्वावच्छिन्नाधिकरणतायाः, तन्निरूपक-तायां वा गन्धप्रकारता निरूपित विशेष्यत्व त्वावच्छिन्न समनियतत्व विरहान्नदोषः। अस्य लक्षणस्य निर्विकल्पकेऽभावात् तादृश प्रकारता-ऽनिरूपकत्व संभवात् तस्यापि प्रमात्वापत्तिः, अतः सप्रकारकत्वमिति तद्वारकं पृथक् दलं प्रमा लक्षणे निवेशनीयम्। स्मृतावतिव्याप्ति वार-णाय प्रमालक्षणेऽनुभवत्वमपि निवेशनीयम्।

एवं भ्रम लक्षणानुसारेण पदानां व्यावृत्तिः प्रदर्शिता। तादृश-प्रकारत्वानिरूपकत्वम् प्रमात्वमिति निष्कर्षः।

प्रमात्व निष्कर्षः

प्रकारता विशिष्ट प्रकार त्वानिरूपकत्वम् यथार्थत्वम्। तत्वेसति सप्रकारकत्वे सति अनुभवत्वम् यथार्थानुभवस्य निष्कृष्टं लक्षणम्। प्रका-रता वैशिष्ट्यं प्रकारतायां स्व तादात्म्य, स्वनिरूपित विशेष्यतात्वावच्छिन्न समनियत निरूपकताक संबन्धितावच्छेदकावच्छिन्न संबन्धित्व, स्वाव-च्छेदक संबन्धावच्छिन्न संबन्धित्वोभयाभाव सामानाधिकरण्योभय संबन्धेन।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथवा प्रकारता विशिष्ट विशेष्य त्वानिरूपकत्वे सति सप्रकारकत्वे सति अनुभवत्वम् यथार्थानुभवत्वम् । प्रकारतावैशिष्ट्यं विशेष्यतायामाधेयता संबन्धेन, आधेयता च स्वनिष्ठावच्छेदकताक प्रतियोगिताक भेदवत्व संबन्धेन । स्वनिष्ठावच्छेदकता स्वसमानाधिकरण भेद प्रतियोगितावच्छेदकत्व संबन्धावच्छिन्ना । स्वाधिकरणता, स्वनिरूपित प्रकारता निरूपित विशेष्यत्वत्व विशिष्टवत्वसंबन्धेन । भेदप्रतियोगितावच्छेदकता च स्व विशिष्ट प्रकारता विशिष्टाधिकरणता (निरूपकता) वत्व संबन्धेन । प्रकारतावैशिष्ट्यं निरूपकतायां आधेयतासंबन्धेन । आधेयता च स्वनिरूपित सम्बन्धितावच्छेदकावच्छिन्न संबन्धित्व, स्वसमानकालीन प्रकरतावच्छेदक सम्बन्धावच्छिन्न संबन्धित्वोभयाभाव सामानाधिकरण्योभय संबन्धेन । प्रकारता वैशिष्ट्यं प्रकारतायां स्वतादात्म्य, स्वनिरूपित विशेष्यतात्वावच्छिन्न व्याप्यनिरूपकता कालीनत्वो भयसंबन्धेनेति ।

अस्मिन् लक्षणे प्रतियोगिवैयधिकरण्यस्यव्यापकतायां निवेशन प्रयुक्तो विचारः गौरवात् त्यज्यते । एवं रीत्या विशेष्यावृत्त्यप्रकार कत्वमिति लक्षणस्य परिष्कारेण मणिकारोक्ता दोषाः परिहृताः ।

सर्वविदः श्रीकृष्णताताचार्या अन्यथा प्रमात्वं परिष्कृतवन्तः। प्रकारताविशिष्ट विशेष्यता निरूपकत्वम् सर्वांशे प्रमात्वम् । वैशिष्ट्यं स्वनिरूपितत्व स्वविशिष्ट प्रतियोगिता निरूपितानुयोगिताश्रयनिष्ठत्वोभयसंबन्धेन । स्ववैशिष्ट्यं प्रतियोगितायां स्वाश्रयनिष्ठत्व, स्व समानाधिकरण भेदप्रतियोगितावच्छेदकत्व संबन्धावच्छिन्न स्वनिष्ठावच्छेदकताक प्रतियोगिताक भेदवत्व उभयसंबन्धेन। स्वाधिकरणता स्वावच्छेदकतावच्छेदकत्वसंबन्धेन, भेदप्रतियोगितावच्छेदकता स्वनिरूपकता निरूपित विलक्षणावच्छेदकता संबन्धेन इति । इदं रजतमिति प्रमास्थलेऽत्रोक्तमधिकरणं समवायत्वं भवति इतिरीत्या लक्षणसमन्वयः

आशिषाऽस्मद्गुरो रत्र सरणिः दर्शिता मया ।
दोषः क्षंतव्य एवात्र यदि स्यात् विबुधोत्तमैः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राचीनसाहित्ये तमसोल्लेखाः

डॉ० कैलाशनाथ द्विवेदी, डी० लिट्,

परमरमणीयप्रकृतेर्नानोपादानेषु नयनाभिरामा नद्यः सन्ति संस्कृतेः सम्पोषिकाः । वैदेशिक नदीषु—नीलह्वांगहोदजला-फरातादिनदीनामिव सिन्धु-सरस्वती-गंगा-सरयूप्रभृतिभिः भारतीयनदीभिः समं तमसाऽपि भारतीयं सांस्कृतिकजनजीवनमविरलधारया समाह्लाद्य पुष्णाति । प्राचीनसंस्कृतवाङ्मये तमसानदीनामनेको¹ल्लेखाः प्राप्यन्ते, यस्मिन्नासां

---

१. (i) **बाल्मीकि रामायणे, बालकाण्डे** २।३ वाल्मीकितपोवनं तमसातटेऽवस्थितमासीत्—

स मुहूर्त्तं गते तस्मिन् देवलोकं मुनिस्तदा ।
जगाम तमसातीरं जाह्नव्यास्त्वविदूरतः ॥

रामा. बाल. २।४ स तु तीरं समासाद्य तमसाया मुनिस्तदा ।
शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम् ॥

अनेनोल्लेखेन तमसा तटीय तीर्थस्य अकदर्मताऽपङ्किलता वा संसूचिताऽस्ति तमसायाः तीर्थे रम्य निर्मलजलेऽवगाहन कामनाऽप्येवं प्रकटिता—

रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ।
इदमेवावगाहिष्ये तमसातीर्थमुत्तमम् ॥

(ii) **मत्स्यपुराण** —(११४।२५)—तमसा ऋक्षपर्वतप्रसूता शोण नन्दना मन्दाकिनी दर्शार्णानदीभिः सह वर्णिताऽस्ति । एवमेव

(iii) **मार्कण्डेय पुराणे**—(५७।२२, २३)—विद्यतेऽस्याः उल्लेखः—

चित्रोत्पला सतमसा करमोदा पिशाचिका ।
तथान्या पिप्पलश्रोणिर्विपाशा वञ्जुला नदी ॥
सुमेरुजा शुक्तिमती शकुली त्रिदिवा क्रमुः ।
ऋक्षपादप्रसूता वै तथान्या वेगवाहिनी ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महन्महत्त्वं धार्मिकैतिहासिक सांस्कृतिक दृष्ट्या संदृश्यते सुधीभिः साहित्याध्येतृभिः ।

तमसायाः लोकप्रियता—प्रतीयते, प्राचीनकालेऽस्माकं भारतदेशे तमसानदी गंगा-सिन्धु-सरस्वती-सरयू-नर्मदा-गोदावरी-कावेरी नदीनामिव विशेषलोकप्रियाऽऽसीत् । अतएव अस्याः पावनतां मनोरमताञ्च संवीक्ष्य वाल्मीकिसमाः साधुमुनिजनास्तटयो सुरम्या[1]श्रमान् निर्मितवन्तः, दशरथ-सदृशाः प्रतापिनरेशाः यज्ञवेदिकाः, स्वर्णिमयज्ञ[2]यूपाँश्चास्यास्तटयोः स्थापितवन्तः, श्रवणसदृशाश्च श्रद्धालवः[3] तीर्थरूपिणीमिमां सततं श्रद्धया सेवितवन्तः ।

तमसातटीय सघनवनेषु वानप्रस्थिभिः सुखशान्तिलाभः, मनसः प्रसादः, आखेटकैश्च मनोवाञ्छिता मृगयाऽपि प्राप्यते स्म ।

टोंसाऽभिधानेन समीकृतास्तमसानद्यः नैकाः—प्राचीनतमसायाः समीकरणं प्राचीनभूगोल[4]विदो विद्वांसः सामान्यतया 'टोंस' नद्या सह कुर्वन्ति,

---

(iv) **रघुवंशे**—९।२० ऋतुषु तेन…कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसा-सरयूतटाः ।

रघु. ९।७२ अथ जातु…तपस्विगाढां तमसां प्राप्य नदीं तुरंगमेण ।

रघु. १४।७६ अशून्यतीरां मुनिसंनिवेशैस्तमोपहन्त्रीं तमसामवगाह्य ।
तत्सैकतोत्संग बलिक्रियाभिः सम्पत्स्यते ते मनसः प्रसादः ॥

१. रामा. बाल. २।३, ४, ५ ।

२. रघु० ९।२७

३. रघु० ९।७२ रामा. अयो. ६३।२०

४. D. C. Sircar, Studies in the Geography of Ancient & Med. India Delhi, 1960, P. 143
S. N. Majumdar, Ancient Geog. of India, Culcutta, 1923, P. 119.
Pargitor Ancient Indian Historical Traditions. P. 296
डी० सी० सरकारमतमनुसृत्य डॉ० एस० जी० कण्टावाला कथयति तमसा-समीकरणे—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किन्तु, इमाः टोंसनद्योऽपि नैकाः विद्यन्ते । इदं ज्ञायते विविधैः सन्दर्भैः स्थलस्वरूपसहायकादि नदीगतभिन्नतानुसारम् ।

(१) यमुना-सहायिका पर्वतीया तमसा (टोंस) नदी—

उत्तराखण्डे गढवाल (हिमालय) क्षेत्रे उत्तरी पश्चिमी पर्वत श्रृंखलासु प्रवाहितेयं तमसा[1] (टोंस) नदी यमुनायाः दक्षिणे तटे देहरादूनं निकषा सिरमूर समीपे यमुनां संगच्छते । अस्याः धार्मिकैतिहासिकसांस्कृतिक-महत्त्वगत सन्दर्भः सामान्यतो न प्राप्यते, नापि पुराणान्तर्गतमहत्त्वपूर्ण-घटनाभिरियं सम्बद्धा प्रतीयते ।

(२) गंगा-सहायिका अवधक्षेत्रीया तमसा (टोंस) नदी—

तमसेयमवध (कोशल) राज्यस्य महत्त्वपूर्णा नदी महाराजदशरथ-रामसदृशनृपाणां नानाविधक्रियाभिः, स्मरणीयघटनाभिश्च सुसम्बद्धाऽस्ति। महाराजादशरथोऽस्यास्तटयोः समीपे स्वर्णिमयज्ञ[2]स्तम्भान् स्थापयामास, मृगया[3] क्रीडां चकार, श्रवणकुमारवधमप्यत्रैवाऽज्ञानतया कृतवाञ्च । भगवान् रामः वनवासयात्रासमये सीतालक्ष्मणसार्धं तमसातटमेव प्रथमं

"It (Tamasa) is a name of a river which is identified with the modern Tons, flowing into Ganges below Allahabad" (Cultural Hist. From Matsya Puran. Barauda 1964 P.219) & I. H. Q. Vol. XXII P. 222)

उत्तररामचरितस्य तृतीयाङ्के जनस्थानीय प्रतीकपात्रमाश्रित्य डॉ० वि० च० लाहा तमसां पञ्चवटी क्षेत्रे प्रवाहितां मनुते, एतदसमीचीनमेव प्रतिभाति । यथा हि—

Tamasā is also a name of a river in Punchvati region, (B. C. Law, Historical Geog. of Ancient India P. 292)

१. कलकत्ता रिव्यू, खण्ड ४८,१८७४ ई०, पृ० १६३ ।

२. रघु. ६।२० क्रतुषु तेन···कनकयूप समुच्छ्रयशोभिनो वितमसा तमसा सरयू-तटाः ॥

३. रघु० ६।७२ अथ जातु···श्रमफेनमुचा तपस्विगाढां तमसां प्राप्यनदीं तुरंगमेण ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विश्रामस्थलं[1] कृतवान् ।

अवधक्षेत्रे उपर्युक्तस्थलसम्बन्धितमसा एकैव नदी टोंस रूपेण मडहा (मनहा नद)-विसुही (प्राचीना वेदश्रुति) इति लघुनद्योः समवेत (संयुक्त) जलप्रवाहं नीत्वा फैंजाबादाजमगढजनपदानतिक्रम्याग्रे बलिया-समीपे गंगा संगच्छते । डी० सी०[2] सरकारमहोदयोऽपि टोंस नदीमिमामुपर्युक्तघटनासम्बन्धिनीं पुरातनतमसां स्वीकरोति, किन्तु श्री वी० एच० वडेरो[3] भ्रमवशादस्याः सहायिकां विसुहीं (वेदश्रुति) नदीमेव तमसामवधारयति—एतदसमीचीनं मतम् ।

सामान्यतः तमसायाः सम्बन्धः पावनश्रवणक्षेत्रेण सह स्वीक्रियते । मडहाविसुहीसंगमे त्रिकोणाकारोत्तुंगे सुरम्यस्थले सम्प्राप्यते शिवमन्दिरमश्वत्थवृक्षविलसितम्, यत्रानुमीयते श्रवणकुमारस्य वधोऽज्ञानतया नृपदशरथेन कृत आसीत् । संभवतः श्रवणकुमारस्यान्धपित्रोराश्रमोऽपि तमसातटनिकटस्थ एवाऽऽसीत् । श्रीराममूर्तिः [4]तिवारी तमसां श्रवणक्षेत्रादाविर्भूतां स्वीकरोति स्वतंत्रभारत-विशेषाङ्के । अस्मिन् पावन तीर्थस्थले मार्गशीषपूर्णिमायां बृहन्मेलापके विशालजनसम्मर्दः एकत्रीभूय शिवमर्चयति, तमसास्नानं करोति, तीर्थदर्शनं करोति च ।

अतएव, अवध (कोशल) क्षेत्रीयसरयूगोमती मध्ये प्रवाहिन्यायास्तम-

१. वाल्मीकि रामा०, अयोध्या० ४५।३२ ददृशे तमसा तत्र वारयन्तीव राघवम् ।
   ,, ,, ४६।१ ततस्तु तमसातीरं रम्यमाश्रित्य राघवः ।
   ,, ,, ४६।१७ अवसत् तत्र तां रात्रिं रामः प्रकृतिभिः सह ।

२. Studies in the Geog. of Ancient & Medieval India, Delhi 1960 P. 47

३. वा० रामायणम् (गीता प्रेस संस्करणम्) सं० २०१९ 'रामायणकालीन भौगोलिक दिग्दर्शनम्' लेखः ।

४. स्वतंत्रभारतं, लखनऊ (सा. विशेषांकः), २४ अप्रैल, १९६६ 'तमसा की जन्मभूमि-श्रवणक्षेत्र'' लेख ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सायाः पौराणिक धार्मिक सांस्कृतिकमहत्त्वं सुस्पष्टमेवाऽस्ति। प्रत्यभिज्ञानमप्यस्याः निर्विवादमेव।

(३) ब्रह्मावर्त्तक्षेत्रे विद्यमाना तमसा (उ० नोन) नदी—

उत्पलारण्यस्य ब्रह्मावर्त्तस्य वा दक्षिणीभागे विठूर द०पार्श्वे गंगां प्रति प्रवाहिनीं लघ्वीं उत्तरीनोनदीमपि लोनलोनीनामान्तरेण तमसां मनुते डॉ० सतीशचन्द्रो[1]ऽवस्थी शोधकर्त्ता। रामायणस्य सीता-परित्यागसम्बन्धि-वृत्तान्तः,[2] वाल्मीकितपोवनस्य संन्निकटता, लवकुशरणस्थलं रमेलं (रणमेलेति), सीता-परिहार-स्थलं 'परियारं', सीताकुटीरं, वाल्मीकेश्वरमहादेव-मन्दिरं (यस्य जीर्णोद्धारं पेशवा वाजीरावः द्वितीयः कृतवान्), रामाश्वमेध-स्थलस्य नैमिषारण्यस्य नैकट्यञ्च नैकानीमानि तथ्यानि तमसां नदीं प्रतिपादयन्ति पुरातत्त्वविदः परियार समीपे गंगातलस्तरीयोत्खननेन लवकुशयोः पुरातनवाणाग्रभागान् प्राप्तवन्तः। अतएव इमेऽपि सीतापरि-त्यागस्थलं विठूरसमीपमेव[3] प्रमाणयन्ति। अस्मात्कारणात् उत्तरी नोननदी एव लघ्वी तमसा प्रकृत्या प्रतिभाति, अन्यथा पतितपावनीं महानदीं गंगां

१. A Study of Geographical Data in Pnranas. (Lucknow Uni, Thesis) 1965, नदियां, P. 36

२. वा. रामा. उत्तर., ६४।२३ आससाद विशालाक्षी गंगां पापनाशिनीम्।
" " ६४।२६ तारयस्व च मां गंगां दर्शयस्व च तापसान्।
" " ४७।१४, १५, १७।
रघुवंशे १४।५२ गंगां निषादाहृत नौविशेषस्ततार सन्धामिव सत्यसन्धः।
" १४।७६ अशून्यतीरां मुनिसंनिवेशैस्तमोपहन्त्रीं तमसामवगाह्य।
तत्सैकतोत्संगबलिक्रियाभिः सम्पत्स्यते ते मनसः प्रसादः॥

३. N. L. Dey., Geographical Dictionary of Ancient & Med. India P, 101
B. S Upadhyaya, India in Kalidāsa, Alld 1966 P 19
गोविन्दराजः—वाल्मीकि रामायण भौगोलिक विवरणम्, २०१६ वि., पृ० १६००
लेखकः (डा० कैलाशनाथ द्विवेदी)—कालिदास की कृतियों में भौगोलिक स्थलों का प्रत्यभिज्ञान कानपुर, १९६९ (शोध ग्रन्थः), पृ० १५६-१५९।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विहाय गर्भिण्यै स्वभ्रातृजायायै सीतायै लक्ष्मणस्तमसास्नानार्थं किमकथयिष्यत् ?

(४) ऋक्षपादप्रसूता तमसा (टोंस) नदी—

विन्ध्याचलस्य सुदीर्घपूर्वीपादश्रृंखलायाम् ऋक्षमेकलश्रृंखला अनेकपौराणिक नदीनामुद्भवभूमयः सन्ति। शोणतमसा नन्दना-मन्दाकिनी-दशार्णा-चित्रकूटादयः सरितः ऋक्षपर्वतादेवाऽऽविर्भवन्ति तथ्यमिदं प्रमाणीभवति मत्स्यमार्कण्डेयादि पुराणोल्लेखैः।[1]

तमसेयं 'टोंस' इत्यभिधेया मध्यप्रदेशस्य पूर्वीविन्ध्यक्षेत्रीय—ऋक्ष (कैमूर) पर्वतश्रृंखलोद्भवा रीवाँ-सतना-शंकरगढ चाकघाटादिस्थलेषु प्रस्रवन्ती प्रयागस्य पूर्वदिशि सिरसासमीपं गंगां संगच्छते। गंगातमसयोः संगमस्थलेऽस्मिन् क्षेत्रे एवाऽपरं वाल्मीकितपोवनं त्रेतायुगे आसीद् यत्र रामाज्ञया लक्ष्मणः गर्भिणीं सीतां स्वभ्रातृजायां परित्यक्तवान्।

विद्वद्वरेण्यः डॉ० रामजी उपाध्यायः[2] इमां टोंसनदीमेव पुरातनीं तमसां प्रतिपादयति। तस्यावधारणाऽस्ति, यत् ततः (वाल्मीकि तपोवनात्) सीता प्रतिवासिनो वाल्मीकेराध्यक्षे तमसामुपासितुं नीता।

प्रतीयतेऽस्याः टोंस (तमसा) नद्याः प्राचीन प्रवाहः प्राक्तनकाले प्रयागतोऽपि पश्चिमी दिग्भाग एवाऽऽसीत्, यः चित्रकूटक्षेत्रात् दूरं नासीत्, यत्र वाल्मीकि तपोवनं तमसातटेऽवस्थितमासीत्, यतः प्रयागात्परं

---

१. मत्स्यपुराणे—११४।२५, मार्कण्डेय पुराणे ५७।२२, २३।
चित्रोत्पला सतमसा…ऋक्षपादप्रसूता वै तथान्या वेगवाहिनी॥

२. सागरिका—२५।३ (सं० २०४५ वि०) अङ्के द्रष्टव्यः डॉ० उपाध्यायस्य शोधलेखः—
"प्रयागजनपदे वाल्मीकितपोवनम्" पृ० १-५।
(सागरिकायाः) अस्मिन्नेवाङ्के लेखकस्याऽपि लेखः 'वाल्मीकि तपोवन स्थिति विमर्शः' द्रष्टव्यः, पृ० ३७-४०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वनयात्रायां महर्षिरादि कविः वाल्मीकी रामसीतालक्ष्मणदर्शनं चित्र[१]कूट-समीपे कृतवान् ।

तमसानदीनां धार्मिकसांस्कृतिकमहत्त्वम्—

प्राक्तननैकघटनाप्रसंगेषु सम्बन्धितानां विभिन्न तमसानदीनां साँस्कृतिकैतिहासिकधार्मिकादिदृष्ट्या महन्महत्त्वं सुस्पष्टमेव, इदमुपर्युक्ता-नेकसाहित्यिकसन्दर्भैः सिद्ध्यत्येव । सिन्धु-सरस्वती-गंगा प्रभृतिपावन-नदीनामिवासां पवित्रतीर्थरूपे मान्यताऽसामान्याऽऽसीत् । भगवता रामस्यो-दात्तजीवनचरितसम्बन्धितयैव नदीयमीदृशी लोकप्रियाऽभवत्, यत् तमसैकनाम्नोऽनेका नद्योऽभवन् । आसां दर्शनं, स्नानं, पयो ग्रहणञ्च परमपुण्यप्रदं मन्यते श्रद्धालुभिः सत्पुरुषैः ।

अतएव आदिकविसदृशाः मुनीश्वरास्तमसातट एव तपोवनानि (स्वाश्रमान्[२]) स्थापितवन्तः, दशरथसदृशाः क्षितीशाः यस्यास्तटयोरेव यज्ञयूपान्[३] निर्मितवन्तः, श्रवण[४]कुमारोऽपि तमसातीर्थदर्शनाय पित्रोस्तीर्थ-यात्रायै चात्रैवाजगाम । वनयात्रायां रामेण तमसामहत्त्वमनुभूयास्यास्तटे प्रथमो नैशविश्रमो[५] विहितः, सीता-परित्यागोऽपि गंगानिकटवर्तिन्यास्तम-सायास्तटे लक्ष्मणेन कारित आसीत् ।

उपसंहारः—उपर्युक्तविवेचनाधारेण कथयितुं शक्यते निष्कर्षे यत्—पौराणिकानेकतमसानदीषु यमुनासहायिकायाः पर्वतीयायाः टोंस (तमसा)

१. वा० रामा०, अयोध्या० ५६।१६ अभिगम्याश्रमं सर्वे वाल्मीकिमभिवादयन् ।
२. वा० रामा०, बाल० २।३, ४, ५, ६ ।
३. रघु० ९।२० क्रतुषु तेन...
४. वा० रामा०, अयोध्या० ६३।२० तस्मिन्नतिसुखे काले...सरयूमन्वगां नदीम् ।
„ अयोध्या० ६३।२४-५३ श्लोकेषु श्रवणवधाख्यानं वर्णितमस्ति ।
५. वा० रामा०, अयोध्या०, ४५।३२ ददृशे तमसा तत्र वारयन्तीव राघवम् ।
„ „ ४५।३३ ततः सुमंत्रोऽपि रथाद्विमुच्य...तमसाविदूरे ।
रामा० अयोध्या० ४६।१ ततस्तु तमसातीरं रम्यमाश्रित्य राघवः ।
„ „ ४६।१७ अवसत् तत्र तां रात्रिं रामः प्रकृतिभिः सह ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नद्याः विशेषं धार्मिकमहत्त्वं नासीत्। तमसानामसाम्येऽपि त्रिभिन्नस्थलीयाः भिन्नास्तमसाः प्राक्तनमूलरूपे कालक्रमेण यत् किञ्चित् प्रवाहे परिवर्तिताः संजाताः सन्ति, किन्त्वासां धार्मिकसांस्कृतिकैतिहासिकमहत्त्वं न्यूनं नैवाऽभवत् ।

अस्माकं राष्ट्रीयेतिहाससंस्कृतिसाहित्यादिरूपाणां साक्षीभूता गंगायमुना तमसाद्यनेकनद्यो वन्दनीयाः सेवनीयाश्च सर्वथा। आसां नयनाभिरामनैसर्गिकीसुषमासंरक्षणार्थं, प्रदूषणत्राणाय, सलिलस्य प्राकृतिक-गुणसम्वर्द्धनाय च सर्वैः सततं सत्प्रयासः करणीयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्प्रदानत्व विमर्शः

केशवकुमार रायः

आचार्यः पाणिनिः सम्प्रदानं दश सूत्रै निवक्ति (पा. सू. १.४.३२-४१)। तत्र प्रथमं सूत्रं कर्मणा यम् अभिप्रैति स सम्प्रदानम् इति १।४।३२। अत्र कर्तृ पदम्[1] अध्याहर्त्तव्यम्। अस्मिन् सूत्रे कर्मणा यम् अभिप्रैतीति अंश उद्देश्येत्वेन उपात्तो वर्त्तते। सम्प्रदानमिति विधेयं विद्यते। स इति सर्वनाम ''सर्वनाम्नां बुद्धिस्थत्वोपलक्षित तद् तद्धर्मावछिन्ने शक्तिरिति न्यायेन पूर्वोक्तम् उद्देश्यरूपम् अर्थं बोधयति। स च उद्देश्यरूपोऽर्थः सविशदम् अधस्ताद् विविच्यते।

कर्मपदोत्तरं तृतीयायाः करण[2]त्वमर्थः। अभिप्रैतीत्यस्य सम्बद्ध्नातीति ईप्सतीति[3] वाऽर्थः। कर्त्ता करण भूतेन कर्मणा कर्मसंज्ञकेन गवादि द्रव्येण यम् अभिसम्बद्ध्नाति अभिसम्बद्धुम् इच्छति वा सोऽर्थः सम्प्रदान संज्ञको भवति।

अत्र सूक्ष्मेक्षकाणां जायते विचिकित्सा : ''कथमेक[4] मेव वस्तु युग-

---

१. कर्मणा=करणभूतेन कर्त्ता यम् अभिप्रैति सम्बद्ध्नाति = ईप्सतिवा तत्कारकं सम्प्रदानं स्यात्। शब्द कौस्तुभः १।४।३२।

२. (क) कर्मणा=करण भूतेन, काशिका १।४।३२।
(ख) कर्मणेति करणे तृतीयेत्युक्तम्।
पदमञ्जरी ।१।४।३२।

३. अभिप्रपूर्वो हीण् ईप्सतिना समानार्थः।
अभिप्रेतम् इत्युक्ते ईप्सतीति गम्यते।

४. पदमञ्जर्याम् १।४।३२। सूत्रे।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पत् कर्म च करणञ्च भवतीति"। "क्रिया[५] भेदसम्बन्धात्"। तद्यथा ददाति क्रियया आप्तुमिष्टतमत्वात् तस्य कर्मत्वम्, अभिप्रयण क्रियायां तस्य साधकतमत्वात् करणत्वम्। शिष्यः दीयमानया गवा उपाध्यायम् अभिप्रैतीति अत्रत्यं तात्पर्यम्। अभिप्रैतीत्यस्य सम्बन्धविषयकेच्छापरत्वात् उपाध्यायगवादीनां कीदृशः सम्वन्धः कर्त्तुरभिप्रेतो वर्त्तते इति आशङ्का जागर्त्ति। प्रोक्तयोरनयोः सम्बन्धस्तावत् स्वस्वाभि[६]भावादिरूप एव। अत्र क्रियाकृत भेदमादाय कर्मणोऽपि करणत्वं साधितम्। करणत्वं तावत् व्यापारवत्त्वे सति असाधारण कारणत्वमिति। अर्थात् यद् व्यापाराव्यवधानेन फलं निष्पद्यते तत्। अभिसम्बन्धक्रियां प्रति कर्मणः कश्च तादृशो व्यापारो वर्त्तते यः तद् कर्म करणं सम्पादयति ?

तन्निरूप्यतेऽत्र धात्वर्थतावच्छेदक फलाश्रयस्तावत् कर्म भवति। प्रत्यासत्या कर्मत्वप्रयोजकफलस्यैव कर्मवृत्तिव्यापारत्वं कल्प्यते। यस्मिन् समये गौः परस्वत्वरूपफलाश्रयो भवति तस्मिन्नेव समये गौः उपाध्यायस्य च परस्परम् अभिसम्बन्धरूपं फलमुत्पद्यते। एवं गोरूपं करणं परस्वत्वफलरूप व्यापारेण गवुपाध्याययोः अभिसम्बन्धरूपं फलम् उत्पादयति। एतदेवाऽत्र कर्मणः करणत्वम्।

सम्प्रदान संज्ञायाः अन्वर्थत्व प्रदर्शनम् न्यासकाराणां जिनेन्द्रबुद्धिसूरीणां मतम्

पूर्व व्याख्यानानुसारेण सूत्रार्थः एवं सञ्जातः कर्त्ता करणभूतेन कर्मणा यं सम्बन्धविषयं कर्त्तुमिच्छति सोऽर्थः सम्प्रदान संज्ञको भवति।

न्यासकाराः प्रतिपादयन्ति—एतावान् अर्थो यदि सिद्धान्तरूपेण स्वीक्रियते तर्हि—महती विप्रतिरापतति। तथाहि—"गोविन्दः ग्रामम्

५. न्यासे १।४।३२। सूत्रे।

६. लघु शब्देन्दुशेखरे तत्रैव।
यथा ब्राह्मणाय गां ददातीत्यादौ दानक्रिया कर्मीभूतगोसम्बन्धाय ब्राह्मणो दान क्रियोद्देश्यः, गो ब्राह्मणयोः स्वस्वाभिभावः सम्बन्धः। परमलघु मञ्जूषायां चतुर्थी निरूपणे।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अजां नयती"ति वाक्ये नयन क्रियाकर्मभिः अजादिभिः सम्बद्ध्यमानस्य ग्रामस्याऽपि सम्प्रदान संज्ञा प्रसज्यते । इमाम् आपत्तिम् अपाकर्त्तुं न्यासकारः अस्याः संज्ञायाः अन्वर्थत्वं[७] स्वीकरोति । लघीयस्या संज्ञया एव अभीष्टसिद्धौ आचार्यः इमां गुरुभूतां समारब्धवान् । एवं व्यापार गौरवान्निश्चीयते यत् आचार्यस्य पाणिनेः अन्वर्थत्वे तात्पर्यम् । तेन दाधात्वर्थ कर्मणा वा यम् अर्थं कर्त्ता अभिसम्बन्धुमिच्छति सोऽर्थः कारक संज्ञकः सन् सम्प्रदान संज्ञको भवति ।

एवं ग्रामम् अजां नयतीत्यत्र दाधातोः, तत्समानार्थकधातोर्वा अभावेन न ग्रामस्य सम्प्रदान संज्ञा इति तत्वम् ।

वस्तुतस्तु ग्राममजां नयतीत्यत्र ग्रामस्य सम्प्रदानत्ववारणाय सम्प्रदान संज्ञायाः अन्वर्थत्वप्रदर्शनं नावश्यकम् । न्यासकाराणां मतन्तु केवलमविचारितरमणीयमेव ।

पदमञ्जर्यां शब्दकौस्तुभे च ग्राममजां नयतीति वाक्ये सम्प्रदानत्वलक्षणस्य अतिव्याप्तिः अतीव सूक्ष्मरीत्या उद्धृता वर्त्तते ।

कर्मणा यमित्यादि सूत्रे यमितिनिर्दिष्टस्य शेषित्वं, कर्मणेति निर्दिष्टस्य शेषत्वञ्च प्रतीयते । प्रकृते यस्य शेषित्वं तस्यैव सम्प्रदानत्वम् ।

शेषत्वं नाम उपकारित्वम्[८], अर्थात् परोद्देश्यप्रवृत्तिकत्वम् । शेषित्वन्तु उद्देश्यत्वरूपम् । अत्र शिष्य उपाध्यायाय गां ददातीति वाक्ये, गामिति कर्म उपाध्यायमेव उपकरोति । यतोहि उपाध्यायस्यैव स्वत्वं भवति । अतः गवि शेषत्वं वर्त्तते । उपाध्यायम् उद्दिश्य गोः विसर्जनात् गवा स्वत्व निरूपकत्वेन उपाध्यायस्य अभिसम्बन्धात्, उपाध्यायस्यैव शेषित्वम् अभिमतं वर्त्तते ।

---

७. सम्यक् प्रकर्षेण दीयते यस्मै तत् सम्प्रदानमिति । न्यासः ।१।४।३२।

८. शेषत्वमुपकारित्वं द्रव्यादावाहवादरिः पारार्थ्यं शेषता तच्च सर्वेष्वस्तीति जैमिनिः । माधवाचार्यः, अधिकरणमालायाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परम् अजां ग्रामं नयतीति वाक्ये अजा न तावत्[९] ग्रामं प्रतिशेष-भूता। अत्र नयनकर्त्तुः (नेतुः) इच्छैव नियामिका। यत्र नेता अजा ग्राम-सम्बद्धा भवतु इति इच्छति, तत्र अजायाः ग्रामोपकारकत्वं नाऽभिप्रेतं नेतुः। एतेन अजायाम् उपकारकत्वलक्षणं शेषत्वं नैव आयातम्। तस्मात् अजाग्रामयोः उपकारकोपकार्यरूप शेषशेषित्वाऽभावात् न ग्रामस्य सम्प्रदानसंज्ञा इति तत्वम्।

ग्रामस्य सम्प्रदानत्व वारणाय पदमञ्जर्याम् उपायान्तरमपि आश्रितं वर्त्तते। अजां प्रति ग्रामस्य अधिकरणत्वात्, अजां ग्रामे नयतीत्यपि साधीयान् एव प्रयोगः। परन्तु यत्र अधिकरणत्वेन रूपेण नाऽस्ति विवक्षा तत्र कर्मसंज्ञैव भवति। यदि अजायाः ग्रामोपकारकत्वं नाऽभिप्रेतं नेतुः। अत एव भाष्यकारेण द्विकर्मकेषु अयं णीञ् प्रापणे इति धातुः पठितः।[११]

यत्र तावत् नेता ग्रामोऽजा संयुक्तो भवत्विति इच्छति, तत्र अजां ग्रामाय[१२] नयतीति प्रयोगो भवत्येव। यतोहि नेता इच्छति : अजायाः पुरीष सम्बन्धेन ग्रामस्य उपकारो भवतु। स च ग्रामस्य उपकारः अधिक-सस्योत्पादनक्षमतारूपः।

---

९. (क) न चाऽत्र शेषशेषिभावः प्रतीयते। पदमञ्जर्याम् १।४।३२।
(ख) न चेह ग्रामं प्रति अजा शेष भूता। शब्दकौस्तुभे तत्रैव।

१०. "किञ्च नीवह्योर्हरतेश्च" इति द्विकर्मकेषु नयतिः परिगण्यते, अतोऽपि ग्रामस्य संप्रदान संज्ञा न भविष्यति। पदमञ्जर्याम् तत्रैव।

११. (क) नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।
द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः॥
अकथितञ्च इति पा. सू. ।१।४।५१। महाभाष्ये।
(ख) अकथितञ्च इति पा. सू. ।१।४।५१।, अस्य यदा सर्वेषां द्विकर्मकाणां धातूनां व्यापारद्वयार्थकत्वं मत्वा प्रत्याख्यानं, तदानीं कर्त्तुरीप्सिततमं कर्म इति पा. सू. ।१।४।४९। द्वारा कर्मसंज्ञा इति अवधेयम्।

१२. तदा ग्रामस्य सम्प्रदानत्वं भवत्येव। पेरी सूर्यनारायण शास्त्री, भू. सा. सुवर्थ निर्णयतत्वदर्शिन्याम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नागेशभट्टस्य मतम्

आचार्यो नागेश भट्टः बिषयेऽस्मिन् सर्वथा भिन्नमेव मतं पुष्णाति। तन्मते अजां ग्रामं नयतीति वाक्ये चतुर्थीविभक्ति वारणस्य प्रकारो विलक्षण एव। तथाहि करणभूतेन गोरूपेण कर्मणा यमभिप्रैति स सम्प्रदानम्।१।४।३२ इति पा. सू. द्वारा सम्प्रदान संज्ञा प्राप्नोति। किञ्च गोनिष्ठाधेयता निरूपिताऽधिकरणत्वेन रूपेण विवक्षाऽभावे ग्रामस्य "अकथितञ्व"।१।४।५१। इति पा. सू. द्वारा कर्म संज्ञा प्राप्नोति। एवमत्र अनयोः विप्रतिषेधे जाते तु परा[१३] कर्मसंज्ञा एव भवति विप्रतिषेधे परं कार्यम् इति पा. सू. १।४।२। द्वारा।

नागेशभट्ट मत समीक्षणम्

अजानयन कर्त्तुः (नेतुः) ग्रामम् अजां नयतीति वाक्ये द्विविधं तात्पर्यं वरीवर्त्ति। (क) अजा ग्राम सम्बद्धा भवतु इति।

(ख) ग्रामः अजा सम्बद्धो भवतु इति च।

नेतुः अनयोः प्रथमं तात्पर्यं तदा भवति यदा असौ अजया ग्रामस्य कमपि उपकारं न वाञ्छति, अपितु स्वोपकारकत्वेन अजां ग्रामं नयति।

एतेन अत्र अजाग्रामयोः उपकारकोपकार्यभावरूपः शेषि शेषभावो न सिध्यति। शेषित्वे सत्वे एव सम्प्रदान संज्ञा भवति। एवं प्रथमतात्पयकाले अधिकरण संज्ञा, तत्प्रयुक्ता द्वितीया विभक्तिश्च सिध्यति। तथाहि: ग्रामे अजां नयति। ग्रामम् अजां नयति।

द्वितीयं तात्पर्यं नेतुस्तस्मिन् काले भवति यस्मिन् काले असौ अजया ग्रामस्य कमपि उपकारं वाञ्छति। उपकारकत्वे तु अनयोः उपकारकोपकार्य भावरूप शेषिशेषभाव उपपद्यते सुतरामेव। ततः शेषि वाचकस्य ग्रामपदस्य सम्प्रदानसंज्ञा भवति, अपि च द्विकर्मकेषु परिगणनात् सम्प्रदानत्वेन रूपेण विवक्षाऽभावे कर्मसंज्ञा जायते। अतएव अस्मिन्

१३. यद्यपि ग्राम संस्कारार्थम् अजानयने तदपि ग्रामस्य अस्ति, तथाऽपि अजाया इव परत्वात् "कर्त्तुः" इति कर्मसंज्ञया बाधात् न दोष इति तत्वम्। लघुशब्द रत्ने, कर्मणा यमभिप्रैति इति पा. सू. १।४।३२।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयतात्पर्येऽपि द्विविधमेव वाक्यम् । तथाहि एकम् अजां ग्रामाय नयति, द्वितीयम् अजां ग्रामं नयतीति ।

अत्र किञ्चिद् विविच्यते : ग्रामस्य अधिकरणत्वेन विवक्षाऽभावे सम्प्रदानत्वेन विवक्षाऽभावे एव उभय विधतात्पर्ययोः "अकथितञ्च" इति पा. सू. १।४।५१। द्वारा, अस्य खण्डनावस्थायां "कर्त्तुरीप्सिततमं कर्म" इति पा. सू. १।४।४९ । द्वारा कर्म संज्ञा भवति ।

एवं ग्रामस्य शेषित्वोपपत्यनन्तरमपि विरोधाऽभावेन सम्प्रदानसंज्ञा कर्म संज्ञा च सिध्यति । यतो हि "विवक्षातः कारकाणि भवन्तीति भाष्यात् "वस्तुत[14] स्तदनिर्देश्यं नहि वस्तु व्यवस्थितम् । स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ।। इति वाक्यपदीयाच्च कारकाणां वैवक्षिकत्वं प्रसाधितम् । तस्याः विवक्षायाः अपि प्रामाणिकत्वमपेक्षितम् । अत्र च ग्रामस्य सम्प्रदानत्वकर्मत्वे प्रामाणिके एव स्तः । अतएव शेषित्वसिद्धेः परमपि कर्मसंज्ञया परत्वात् सम्प्रदान संज्ञाबाध इति नागेशोक्तिः[15] असङ्गता एव ।

किञ्च इदमेव मतम् आचार्याणां नागेशभट्टानां सिद्धान्तरूपेण स्वीक्रियते तर्हि तस्यैव ग्रन्थान्तरस्थेन मतेन सह महान् विरोध आपतति ।

अकथितञ्चेति सूत्रस्य लघुशब्देन्दुशेखरे गोः अपादानत्वेन रूपेण विवक्षायाम् पञ्चमी, गोः पयो दोग्धीति वाक्यम्, अपादानत्वेन रूपेण अविवक्षायाम् अकथितञ्चेति सूत्रेण कर्मसंज्ञा, तत्प्रयुक्ता द्वितीया विभक्ति-

१४. वाक्यपदीय तृतीय काण्डे साधन समुद्देशे ९१ कारिका

१५. (क) "यद्यपि ग्राम संस्कारार्थम् अजानयने तदपि (शेषित्वमपि) ग्रामस्य अस्ति, तथाऽपि अजाया इव परत्वात् "कर्त्तु" रिति कर्म संज्ञया वाधान्न दोष इति तत्वम्" । ल. श. रत्ने "कर्मणा" १।४।३२। इति पा. सूत्रे ।

(ख) अजां ग्रामं नयतीत्यादौ परया कर्म संज्ञया बाधान्नदोषः । वै. सि. ल. मञ्जूषायां सुबर्थ निर्णये ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्च प्रसाधिता आचार्येण भट्टेन नागेशेन[१६]।

यदि शेषित्वसिद्धेः परमपि नीधातुस्थले सम्प्रदान संज्ञा परया कर्म संज्ञया बाध्यते तर्हि दुह् धातु स्थले परया कर्मसंज्ञया अपादान संज्ञा कुतो न बाध्यते ? शास्त्र व्यवस्थायामपि नागेशाचार्येभ्यः पक्षपात पूर्णा दृष्टिः कथं रोचते इति विपश्चिद्भिरेव विवेचनीयम् ।

अन्वर्थत्वे हरदत्त मिश्राणां मतम्

पदमञ्जरीकाराः हरदत्त महाभागाः महतीमिमां संज्ञां विलोक्य अस्याः अन्वर्थत्वं प्रतिपादयन्ति । तेन सूत्रार्थः सम्पद्यते दाधात्वर्थक्रिया-निरूपित कर्मणा कर्त्ता यम् अर्थम् अभिसम्बन्धुमिच्छति सोऽर्थः सम्प्रदान संज्ञको भवति । दाधात्वर्थ क्रिया दानरूपा एव ग्राह्या । दानं नाम किञ्चि-दुद्दिश्य अपुनर्ग्रहणाय स्वस्वत्व निवृत्ति पूर्वक परस्वत्वोत्पत्तिः । एतदेव दाने सम्यक्त्वम् । एतेन रजकाय वस्त्रं ददातीति प्रयोगः असाधुः । यतोहि दातुः स्वत्वं न निवर्त्तते, न च ग्रहीतुः रजकस्य स्वत्वमुत्पद्यते । यदि अस्य कथञ्चित् साधुत्वं प्रतिपिपादयिषितमेव, तर्हि ददाति प्रयोगः लाक्षणिक[१७] एव इति स्वीकर्त्तुं शक्यते ।

हरदत्तमतसमीक्षा

वस्तुतस्तु उभौ अपि अर्थौ असङ्गतौ । दाधात्वर्थयोगे एव सम्प्रदान संज्ञा इतिमतस्य कुतोऽसाधुत्वम् ? यतोहि पाणिनिः[१८] दाधात्वर्थातिरिक्तानां बहूनां धातूनां प्रयोगे सम्प्रदान संज्ञायाः प्रयोगं कृतवान् । किञ्च क्रियया

१६. तत्र गोरपादानत्वाऽविवक्षायामनेन कर्मत्वं तद् विवक्षायाञ्च पञ्चमी, गोः पयस्यन्वये षष्ठी ॥
ल श शे. अकथितञ्चेति पा. सू. (१।४।५१।

१७. इह दि ददातिर्गौणः, न तु वास्तवं दानमस्ति । शब्दकौस्तुमः ।१।४।३२।

१८. But, in any case the next rules P. 1.4, 33—41, extended the scope of this designation to cases where the etymological meaning of the term does not fit any more.
M. bh. trans, S. D. Joshi : Karakahnika P. 109.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यमभिप्रैति सोऽपि सम्प्रदानमिति वार्त्तिकस्य, गत्यर्थ कर्मणि द्वितीया चतुर्थ्यौ चेष्टायामनध्वनि पा. सू. २।३।१२ इति च प्रत्याख्यानं भाष्यकारेण कृतम्। उभाभ्यामपि सूत्रवार्त्तिकाभ्यां यत्र यत्र चतुर्थी विभक्तिः साधुत्वेन बोधिता तत्र तत्र कर्मणा यमभिप्रैति सः सम्प्रदानमिति पा. सू. १।४।३२ द्वारा एव सम्प्रदान संज्ञायाः साधुत्वं व्यवस्थापितं पतञ्जलिना। कर्मणा इति सूत्रेणैव ते सूत्रवार्त्तिके कथं गतार्थी क्रियते इति अग्रे यथा प्रसङ्गं प्रस्तोष्यते। एवमत्र उभयत्र दाधातुत्वाऽभावेऽपि भाष्यकारेण सम्प्रदानसंज्ञायाः प्रयोगः स्वीकृतः। तस्मादिदं त्रिमुनिसम्मतं मतं वर्त्तते। अन्वर्थ संज्ञाबलेन यः द्वितीयोऽर्थः लभ्यते, तस्याऽसङ्गतिस्तु अधस्तात् वितन्यते।

यदि सर्वत्रैव दाधात्वर्थ क्रियादानरूपैव इति हरदत्त मिश्रानुसारं स्वीक्रियते तर्हि "खण्डिकोपाध्यायः[१९] शिष्याय चपेटां ददाति" इति वाक्ये "शिष्याय" इत्यत्र सम्प्रदानत्वनिबन्धनायाः चतुर्थी विभक्तेः कागतिर्भवेत्? तथैव न शूद्राय मतिं दद्यात् इति मनुस्मृति प्रयोगोऽपि असङ्गतिं प्राप्नुयात्। अत्र उभयत्राऽपि दाधातोः दानरूपोऽर्थः नैव वर्त्तते।

अतएव अस्याः संज्ञायाः भाष्याऽसम्मतं संकुचितमन्वर्थत्वं प्रतिपाद्य लक्ष्यैकचक्षुष्काणां महाभाष्यकारादीनामेव प्रयोगाणाम् असाधुत्व वर्णनं सर्वथा प्रामादिकमेव।

हेलाराजमतोन्मज्जनम्

कर्मणा यमभिप्रैति इति पा. सू. १।४।३२ द्वारा विधीयमानायाः, अत्रत्येन क्रियया यमभिप्रैति इति वार्त्तिकेन च क्रियमाणायाः सम्प्रदान संज्ञायाः अन्वर्थत्वेन, लौकिकत्वम् अङ्गीकृतं वाक्यपदीयस्यप्रकाशव्याख्यायां हेलाराजेन।

१९. महाभाष्ये १।१।१। पा. सूत्रे।
२०. अन्वर्थत्वात् सम्प्रदान शब्दस्य "त्यागाङ्गम्" इति लक्षण लाभः। वा. प. साधनसमुद्देशे का. १२९।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वर्थत्वमित्यस्य तात्पर्यम्

सम्यक् : स्वस्वत्व निवृत्ति पूर्वकं प्रदीयते — परस्वत्वमुत्पाद्यते, यस्मै तत् सम्प्रदानम्। एतादृशरीत्या वैयुत्पत्तिकस्य अर्थस्य कर्मणा इत्यादि पाणिनिकृत सूत्रेण यस्मिन् यस्मिन् लक्ष्ये सम्प्रदान संज्ञा क्रियते तस्मिन् लक्ष्ये संघट्यमानत्वात् इयं संज्ञा अन्वर्था इति स्वीकरोति हेलाराजः।

लौकिकत्वमित्यस्य च तात्पर्यम्

यथा वृद्धिरादैच् इति सूत्रेण वृद्धि संज्ञा क्रियते आदैचाम्। यदि वृद्धिशब्दस्य लोकेयोऽर्थः स्वीक्रियते सोऽर्थः संघटेत शास्त्रेऽपि तर्हि तस्याः संज्ञायाः लौकिकत्वमिति व्यवहारो भवेत्। परन्तु लौकिकोऽर्थोऽस्यां (वृद्धि संज्ञायाम्) नैव घटते। अतोऽस्याः लौकिकत्वम्वा, अन्वर्थत्वम्वा नैव अङ्गीक्रियते विपश्चिद्भिः।

परमियं स्थितिः उपर्युक्त सूत्रेण (पा. सू. १।४।३२।) तद्वार्त्तिकेन च क्रियमाण सम्प्रदान संज्ञा विषये नाऽस्ति। तत्र अस्य शब्दस्य यमर्थमुररी कुर्वन्ति तात्विकाः, स एवाऽर्थः शास्त्रेऽपि स्वीकृतो वर्त्तते। अतोऽस्याः संज्ञायाः लौकिकत्वमिति आचार्यः हेलाराजः समुपस्थापयति।

एतदतिरिक्तेषु नवसु सूत्रेषु (पा. सू. १।४।३३-४१) अस्याः संज्ञायाः अनन्वर्थत्वम्, शास्त्रीयत्वञ्च स्वीकृतं तेन। वस्तुत एतन्मतं बहुदोषग्रस्तम्। अतो नाऽऽदरणीयम्। दोषास्तु अधस्ताद् वितन्यन्ते।

अनन्वर्थत्वमित्यस्य तात्पर्यम्

अन्वर्थत्वम् अस्याः संज्ञायाः पूर्वं प्रदर्शितम् आस्ते। तत् प्रोक्तेषु नवसु सूत्रेषु नैव संघटते। अतोऽनन्वर्थत्वम् अस्याः संज्ञायाः एषु एव सूत्रेषु। विस्तरस्तु नवसूत्र व्याख्यानावसरे क्रमशः प्रदर्शितः।

आचार्यो भर्तृहरिः शब्देन क्वाऽपि इदं न प्रकाशयति यत् संप्रदानमिति या कारकाऽधिकारपठिता संज्ञावर्त्तते सा अन्वर्थ इति। सः साधना-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समुद्देशे वाक्यपदीये सम्प्रदानसंज्ञा विचार प्रसङ्गे कारिका[२१] द्वयीं प्रावोचत।

आचार्यः पाणिनिः सम्प्रदानं दश सूत्रैः निर्वक्ति (पा. सू. १।४।३२-४१)। तदेव भर्तृहरिः द्वाभ्यां कारिकाभ्यां प्रकटयति। तावता प्रथमसूत्रे सम्प्रदान संज्ञायाः लौकिकत्वम्, अन्वर्थत्वञ्च, अन्येषु नवसूत्रेषु (पा. सू. १।४।३३-४१) शास्त्रीयत्वम्, अनन्वर्थत्वञ्च न सिध्यति।

हेलाराजः "हेतुत्वे कर्मसंज्ञायाम्" इत्यादि (वा. प. सा. स. कां. १३०) व्याख्यानावसरे कारिकास्थं शास्त्रेणेति पदं स्वकीयेन केनचित् पूर्वाग्रहेण विचारयतीव प्रतीयते। प्रथमं या सम्प्रदान संज्ञा उक्ता साऽपि शास्त्रेणैव विधीयते, तर्हि एभिः नवसूत्रैः क्रियमाणायाः सम्प्रदान संज्ञाया एव शास्त्रेण विधानमिति कथमुच्यते इति आशङ्कितं प्रकाशव्याख्याकृता हेलाराजेन। समाहितञ्च तेनैव—सम्प्रदान संज्ञायाः अन्वर्थत्वात् सर्वप्रथमं लौकिक एव सम्प्रदानार्थं उक्तः। परन्तु रुच्यर्थादिषु सम्प्रदानसंज्ञायाः यः शाब्दिकोऽर्थः, तस्य संघटनाऽसम्भवात् शब्दसंस्कार[२२] मात्र प्रतिपादनार्थं शास्त्रेण सम्प्रदानत्वं प्रतिपाद्यते।

एवमेषु लौकिकस्य अर्थस्य संयोजनम् असम्भवम्। प्रोक्तैः नव-

---

२१. अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम् प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्॥ वा. प. सा. स. आ. १२९।
हेतुत्वे कर्म संज्ञायां शेषत्वे वाऽपि कारकम्।
रुच्यर्थादिषु शास्त्रेण सम्प्रदानाख्य मुच्यते॥
तत्रैव १३० कारिका॥

२२. ननु च पूर्वमपि सम्प्रदानं शास्त्रेणैवोक्तम् "कर्मणा यमभिप्रैति" ।१।४।३२। इति पा. सू., तत् कथमत्र शास्त्रेणेति विशिष्य-भणितिः? उच्यते-अन्वर्थत्वात् सम्प्रदान शब्दस्य लौकिक एव अर्थः पूर्वमुक्तः, इह तु रुच्यर्थादि विषये तदर्थाभावात् शब्दसंस्कारमात्रप्रतिपादनाय शास्त्रारम्भसामर्थ्यात् सम्प्रदानत्वमुच्यते इति शास्त्रीय लौकिक भेदेन द्विविधं सम्प्रदानं व्याख्यातम्।
वा. प. सा. स. का. १३० प्रकाशे।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूत्रैः क्रियमाणायाः सम्प्रदान संज्ञायाः शास्त्रीयत्वमेव न तु लौकिकत्वम्। पूर्वत्र शास्त्रीयत्वस्य लौकिकत्वस्य च अर्थस्य संघट्यमानत्वात् लौकिकत्वमेव इति।

समीक्षणम्

पूर्वत्र (पा. सू. १।४।३२) शास्त्रीयत्वस्य लौकिकत्वस्य चेत्युभयोः सत्त्वेऽपि लौकिकत्वमेव अभिहितमिति चित्रमेव। तदेव सम्प्रदानपदं १।४।३२ सूत्रात् उत्तरत्र अनुवर्त्तते। एकमेव सम्प्रदानपदम् एकत्र अर्थम् अनुसरति, अपरत्र अर्थं परिहरति। एतेन अर्धजरतीय दोषः सुतराम् आपतति।

अपि च भाष्यकारः कारक संज्ञायाः अन्वर्थत्वं प्रतिपादयन्नपि गुरु भूतानां कारकत्वव्याप्त्याऽपादानादीनां क्वाऽपि अभिधया व्यञ्जनया वा अन्वर्थत्वं नैव प्रत्यपादयत्। यदि आसां संज्ञानाम् अन्वर्थत्वमभिप्रेतं भवेत् तर्हि क्वचिदपि असौ प्रकटयेत्।

किञ्च खण्डिकोपाध्यायः शिष्याय चपेटां ददाति इति नैव प्रयुञ्ज्यात्। अस्मिन् वाक्ये स्थितस्य दाधातोः स्वस्वत्व निवृत्तिपूर्वक परस्वत्वोत्पत्तिरूपोऽर्थो न परिलक्ष्यते। यदि तादृशाऽर्थविशेषे एव प्रयुयुक्षा भवेत् भाष्यकारस्य उपरिदर्शित (म. भा. पा. सू. १।१।१।) वाक्ये दाधातोः प्रयोगं नैव विदध्यात्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कश्मीरे संस्कृतम्

—दीनानाथ यक्षः

भारतवर्षस्योत्तरस्यां दिशि नगाधिराजस्य हिमगिरेरुपत्यकायां सुरम्य पर्वतमालाभिवेष्टिते विविधपतत्रिकुलकूजितदिगन्ते नानावन्यरङ्क्वादिसत्त्वैरधिष्ठित वनान्तदेशे नैकविध भागजलाशय कुण्ड मण्डिते विचित्रतरुततिसमावृते प्रकृति प्रदत्त हरिच्छाद्वलशाटिकावृताखिलावयवे नानानदनदीकासार समाश्रिते अमरेश्वर भूतेश्वर ध्यानेश्वर हर्षेश्वर कपटेश्वर प्रदरेश्वर ज्येष्ठेश्वर सुरेश्वरादिभिः सुविश्रुतैः शिवधामभिरभिभूषिते (पवित्रीकृत कलेवरे) त्रिदेवाश्रितत्रिकूटाद्रित्रितुङ्गे उमावनेस्मारितोमातपश्चर्याचमत्कृतिबहुले प्रकृतिदेव्याः कमनीये विहरणस्थले ललितापरपर्याय श्रीमहाराज्ञी श्रीशारिका श्री बीडा वैखरी शिवा शैल पुत्र्यादिनवदुर्गाज्वालाद्यधिष्टात्रीभिर्देवीभिर्व्राह्म्यादि मातृकाभिश्च सदा कृतसन्निधान पवित्रिते निरन्तर गिरिनिर्झर प्रपातनादमिवकृतसततब्रह्मघोषारावे भवानीवृक्षच्छाविश्रान्त घर्मनितान्ततान्तपान्थव्राते सरसमृद्वीकामृतटङ्कयालीवतारुकवाताददाडिमचिराक्षोटादि फलविशेषैः ग्रीष्मे कृतातिथ्ये (कृत सततातिथिसत्क्रिये) पद्ममहापद्मविष्णुपादक्रमसरोवरकुङ्कुमसुश्रुम वासुकिनागाङ्गाधिपैः प्रवरसरोवरादिदेवैर्नितरां निभालिते सुन्दरी नालकजबरवनकम्बरवनादिगहनवनस्थलीभिरुपाश्रिते प्रत्यूषसिखगारावैर्दीयमानश्रोत्राभिरामनिनादे लोकश्री विजयश्री कालीश्री राजराजेश्वरीश्री महाश्र्यादिभिः श्री सूचकैः श्री पदोपपदैः रूपशोभिताभिः भृङ्गीश पञ्च श्रीदेवी संस्थानाभिः समलङ्कृतेऽतएव श्रीनगर इति प्रसिद्ध राजधानी मण्डिते ।

जय्यट कैय्यट मम्मट व ऋटोद्भट्टादिभिराचार्यवर्यैरध्युषितचर-भृङ्गीश हेलाराज छविल्लाकर सुव्रतक्षेमेन्द्र कल्हण विल्हण जोनराजश्रीवर प्राज्यभट्टशकदामोदर साहिब्रामादिभिरैतिहासिकैः संवर्धित गौरवातिशये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसुगुप्त कल्लट भट्टनारायण भूतिराजसोमानन्दोत्पलाभिनवगुप्तक्षेमराज-योगराज-जयरथशिवोपाध्यायश्रीरामभट्टारक-प्रभृतिभिराचार्यप्रवरैः परि-पोषिताभिनवशैवाम्नाये दामोदर शिवस्वामिरत्नाकर भट्टभौम भट्ट-शम्भूजयद्रथवल्लभ भल्लटाह्लादभट्टजगद्धर साहिबकौल गोविन्दकौल साहिब्रामादि महाकविभिः दिगन्त विस्तारित कविता प्रसून सौरभे महिमभट् टोद्भट्ट शंकुकानन्दवर्धन-रुय्यक भट्टवामन भट्टकुन्तल मम्मट शोभाकर रुचकानन्द राजानक प्रभृतिभिरालङ्कारिकैः प्रोद्भावितकाव्य-शासनातिशयगरिम्णि भावसर्वज्ञ भट्टजयन्तादिनैयायिकैरुपावर्धित न्याय-महिम्नि सदानन्दयति वासुदेव लसकाकैरुपबृंहित वेदान्तोद्योते पतञ्जलि-हेलाराज कैय्यट जगद्धरभट्टकृपालुकोकिल देवभट्टादि वैयाकरणैर्व्याकृत-शब्दशासनसन्दर्भे कश्यप चरकदृढ़बलनरहरि चिन्नभट्ट सल्लसकाकादि-भिषग्वरैः परिशीलितवानस्पतिविज्ञाने वैतस्तिकवारिवीचिनिचयोक्षित विशालभूभागे प्रभातिकमन्द समीरणान्दोलितरुलतानिकुम्बे कुङ्कुमसुवास-सुवासिते गडूचीशतावरी गवेधुकामृतावचाकुष्टापिप्पल्यादिभिराश्रित-वनान्तराले रम्भोर्वशीमेनकातिरस्कारिणीभिः किशोरिकाभिविवर्धित-विच्छितिबिब्बोके सुतरामदृश्यैर्योगिभिरासेविते विद्याधर सिद्धगन्धर्वैरुपो-द्वलितारण्यगिरिकन्दरे यवनैर्विध्वंसितवैभवेऽपि शाणोपलनिघृष्टमणिवन्नि-तरां देदीप्यमाने कश्यपयशः पताकायमाने शारदावासदेशे भूमौ काश्मीर-देशे प्रथमगोनन्दशासनकालादारम्य जयसिंहराज्यपर्यन्तं ११२८-५१ सर्वत्र गीर्वाणगिरः प्रचुरः प्रचारोऽभूत्। अस्मिन्नेवमहीयसि—अनेहसि सुरभारत्याः सर्वाङ्गीणा समृद्धिमूलका समुन्नतिः परां काष्ठामुद-लङ्घयत्। अस्याः षडङ्गानि विविधविषयनिचयैः साकं सुतरां फेलुः। प्रायेण साहित्य स्रष्टारो महाकवयो लेखकाश्चात्र प्रादुर्बभूवुः। यैः समये समये आविर्भूय वाग्देव्याः समाराधनाञ्चक्रे। येषाञ्च रचनात्मकं साहित्यं संस्कृतसाहित्ये सर्वथातिशेते। येषां यशोडिण्डिमनादोऽद्यापि सर्वत्रश्रूयते यद्य-पि राजानकानन्दवर्धन शिवस्वामिक्षेमेन्द्र प्रभृतीनामनेकाः रचनात्मिकाः कृतय अद्यत्वे नोपलयभ्यन्ते येषां बहूनि काव्यानि अदर्शनं गतानि सन्ति येषु विषमबाणलीला, अर्जुनचरितम्, चित्रभारतम् अवसरसारः पद्यकादम्बरी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुक्तावल्यादयः कृतयः केवलं नाममात्रेणैव श्रूयन्ते । इत्थमेव मेण्टस्य हयग्रीववधम् श्रीशङ्कुकस्य भुवनाभ्युदयमित्येवञ्जातीयकाः (प्रकाशाः) शतशो रचना अद्यत्वे दृष्टिपथंनावतरन्ति याः सर्वथा लुप्ता एव सन्ति । काश्मीरनरेशयो सिंहदेवोद्यानदेवयोःशासनकालत एव काश्मीर वैभवातिशयस्य शनैः शनैरानुपूर्व्या ह्रासात्मकः पातः समजनि ।

साकल्येन त्रयस्त्रिंशदुत्तरे त्रयोदशे क्रैष्ट हायने काश्मीर साम्राज्यं जाल्मानां दुर्यवनानां हस्तसादभूत् येन सहस्रशोऽतिप्राचीना ग्रन्थाः लोपमिताः । तदानीं कर्गलस्थाने भूर्जपत्राण्येवोपयुज्यन्ते स्म तुङ्गानि विद्यावेश्मानि पुस्तकमन्दिराणि च भस्मसात् कृतानि काललीलया हिन्दुसभ्यतासंस्कृति विध्वंसि यवनशासन प्राबल्यात् प्रजातङ्काच्च सुदुर्लभानि वेदाम्नायाङ्गभूतानि प्रत्नपुस्तकरत्नानि लुप्तप्रायाणि बभूवुः परं राज्यभाषारूपेण गीर्वाणगीरेव सुचिरंप्रावर्तत ।

श्रीवर राजतरङ्गिण्यां तथाहि—

सेकन्धर धरानाथो यवनैः प्रेरितः पुरा
पुस्तकान् सकलान् सर्वांस्तृणान्यग्निरिवादहत् ॥

सर्ग ५ श्लोक ७५

तस्मिन् समये बुधाः सर्वे मौसुलोपद्रवाज्जवात्
किमन्यद्द्विजवद्देशे सर्वे ग्रन्थाः मनोरमाः
कथावशेषतां याताः पद्मिन्येव हिमागमे ॥ ७६ ॥

मठविहारान्तर्गतानां विद्यानिकेतनानां शारदा मार्तण्डविजयेश्वर श्रीकण्ठादि विद्यालयानां सर्वथा सर्वतश्च लोपो (ह्रासोऽजनिष्ट) येषामेव माध्यमेन तदा शिक्षासरणिः प्रवर्तते स्म (प्राचलत्) दरद्देशाभ्यन्तरे शारदाप्रदेशे द्वारपण्डितानां साहाय्येनैव भारतीया यात्रिणः पण्डिताश्च काश्मीरजं वृत्तं विदन्ति स्म प्रवेशञ्च लभन्ते स्म । ये तु द्वारपतिशासक विभागायत्ता वर्तन्ते स्म ? तदानीं काश्मीरागमनाय जे. वी. बी. सीति प्रसिद्धौ मार्गौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नास्ताम् दरद्देशान्तर्वर्तिना शारदा देशीयेन मार्गेणैव काश्मीरे यातायातं प्रवर्तते स्म। महापावने शारदामठस्थरहस्यात्मके नागे काश्मीरिकाणां भारतीयानाञ्च रचनाः कृतयश्च निकषशाणानुविद्धा महामणय इव परीक्ष्यन्ते स्म—

अत्र सुपरीक्षितास्तास्तावत्पाषाणबुद्धिनिरस्तमणिभावा मणय इव दरीदृश्यन्ते स्म। अत्रत्या एव पण्डिता विविधविद्यानिष्णातेभ्यः पण्डितेभ्यः सम्मानप्रतिष्ठाप्रदान् उपाधीन् वितरन्तिस्म । भारतललाटललामैर्ब्रह्मविद्याविशदीकृतमानसैः सनातनवैदिकधर्मधौरेयैः दूरदिगन्त विद्रावितवेदविरोधिभिः शारीरकभाष्यादि प्रणेतृभिर्भगवच्छंकराचार्यमहानुभावैरत्रैव सर्वज्ञत्वोपाधिरलाभि। श्वेतहंसवाहनायाः शारदादेव्या वासहेतोर्देशोऽयं शारदादेशनाम्नापि प्रसिद्धोऽस्ति । अत्र शारदादेशे वराहमूलाभ्यन्तरे भाष्यभट्टा वैयाकरणमहाभाष्ये कृतश्रमा वसतिञ्चक्रुः कालगत्या येऽभाछभट्ट इति विकृतरूपेणाद्यापि स्मर्यन्ते ज्ञायन्ते च।

अत्रैव पुरा रणवीरसिंहशासने कस्यापि भाष्यभट्टस्य सकाशात् महाभाष्योपलब्धिर्बभूव यत्तदानीं पञ्चाशीत्याह्निकात्मकमासीत् यत्तदानीं नौकायानेन श्रीनगरमानीय दिवङ्गतेन विद्याप्रणयिना श्रीरणवीरसिंहेन शिविकायाञ्चारोप्य स्वस्कन्धदानेन सुमहती प्रतिष्ठां नीतम्। परस्ताच्च प्राथम्येन महाभाष्य सम्पादनपरायणेभ्यः मुम्बापुरीयएलफिण्टन् महाविद्यालयीय संस्कृताध्यापकेभ्यः डा० केलहार्नमहोदयेभ्यः सादरमुपहारीकृतमभूत् किञ्च धर्मप्राणेनानेन महामनीषिणा दूरदर्शिना नरेशेन श्रीरणवीर सिंहेन जम्मूदेशे उत्तरवाहिन्याञ्च रघुनाथसंस्कृतमहाविद्यालयस्य प्रतिष्ठापनानन्तरमेका संस्कृतपाठशाला श्रीनगर्यां प्रतिष्ठापिताऽभूत् या तदानीं रणवीरगंजाभ्यन्तरे स्त्रीयं कार्यंसमारभत। असावेव पश्चात् दिलावरखान बागस्थेन स्टेटहाईस्कूलेनसार्धं समयोजिताऽभूत्। इयमेव राजकीयपाठशालेति नाम्ना व्यपदिश्यमाना काश्मीरे परां ख्यातिमाप। अत्रैव दिल्लारामात्मजः श्रीसाहिब्रामपण्डितो मुख्याध्यापकत्वमुवाह । अस्यैव विद्यालयस्य माध्यमेनानेके विद्यार्थिनः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शास्त्रिपरीक्षामुदतारिषुः। पाठशालेयं प्रायः संवत्सरशतं यावत् प्राचलत्। संस्कृतशिक्षणस्यैकमात्रं प्रतिष्ठानमियमेवासीत्। यैर्तहि राजप्रजोभययोगदानाभावात् लुप्ता अभूत्। एतदतिरिक्ताः काश्चन पाठशालाः संस्कृतशिक्षणाय स्वच्छन्दरूपेणापि प्राचलन्। यासु श्रीनगर्यां भानुमहलाभ्यन्तरे कोकिलगोपालस्य कर्फल्य महले टर्बनोपाठशाला हब्बाकदले श्रीप्रकाशचन्द्रस्य रणादित्यवाटिकायां दामोदर पण्डितस्य च पाठशालास्तदानीं सुचारुरूपेण प्रचलन्ति स्म। यासु सन्ध्यानित्यकर्मस्नानविधिज्यौतिषकर्मकाण्डादि पुस्तकानां शिक्षा निःशुल्कं दीयते स्म। केचन जिज्ञासवश्छात्राश्च अमरकोशसूत्रपाठधातुपाठकातन्त्रकलाप -- व्याकरण —ज्योतिश्शास्त्रादीन्यपि निःशुल्कं पाठ्यन्ते स्म आसु कोकिल गोपालस्य पाठशाला अद्यावधि प्रचलति। एतास्तदानीं सर्वकार साह्यानपेक्षिण्यः स्वच्छन्द गेहान्तर्वर्तिन्य एव प्राचलन्। क्वचित् पारम्पर्येणाम्नायक्रमेण देशिकेभ्यः सकाशात् शैवशास्त्राण्यपि परिशील्यन्तेस्म। प्राधान्येनासावेव श्रीरणवीरसिंहो काश्मीर नरेशो गीर्वाण गिरः पोषकः प्रोत्साहकः संवर्धकश्चासीत्। एतेषामेव प्रोत्साहनेन तदानीं देवसंगिरो बहुमुखीसमुन्नतिर्बभूव। महानुभावस्यास्य संस्कृताश्रिता संस्कृतिरतीव प्रेयस्यभूत्। जम्मुदेशे विविध मन्दिराणां देवालयानामयमेव प्रतिष्ठापको बभूव दूरदर्शिनानेन यवनाक्रांते काश्मीरदेशेऽपि नवदेवमन्दिर निर्माणानां योजनाऽप्यकारि याऽचिरेण-तदीयनाकवास हेतोः क्रियान्विता नाभूत् जम्मुदेशे रघुनाथ महामन्दिरस्य रघुनाथसंस्कृतमहा विद्यालयस्य च जन्मदाता असावेव महानुभावः अस्मिन्नेव महाविद्यालये न केवलं जम्मुदेशीयाश्छात्रा निःशुल्कं विद्यामधिगच्छन्ति स्म किन्तु भारतवर्षस्य विविधप्रान्तेभ्यो विद्यार्थिनोऽत्रागत्य भोजनाच्छादन-पुस्तकादिसत्रसहायेन च ते लाभान्विता भवन्ति स्म अयमेवैको महाविद्यालयः जम्मुदेशे संस्कृतविद्यायाः केन्द्रमासीत्।

अत्रैव जातुचित् श्री अम्बिकादत्त व्यासमहोदयः रामप्रपन्न शास्त्री च तथा नव्य चण्डीदासारूढभानु प्रभृतयो विद्वांसः प्राध्यापकाः वभूवुरिति श्रूयते असौ नरेशः स्वराष्ट्रे संस्कृत माध्यमेनैव कार्यालयेषु कार्यकलापं कर्तुं समोहते स्म प्राथम्येन सैनिकानां प्रशिक्षणन्तदानीं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतभाषयैव भवति स्म एतदर्थं भटशिक्षाभिधो ग्रन्थः सूत्रप्रणाल्या प्राणीयत। यस्य मुद्रणन्तदा लाभ लवपुरेऽभूत् अस्यैव द्वित्राः सचित्राः काश्मीर संग्रहालये ग्रन्थाः हज़रतबले सुरक्षिता वर्तन्ते। संस्कृतमसर्वाङ्गीणं नैकविधनव्यविषयहीनमपूर्णमिति विभाव्य महापण्डितेनानेन-नरेशेन तस्य न्यूनतां पूरयितुं हीनताञ्चापाकर्तुं महान् यत्नो व्यधायि ईदृशीमेवन्यूनतां हिन्दी भाषायामपि तदानीं प्रसमीक्ष्य युगपदेवोभयोः भाषयोः पूर्णतायै सुतरामचेष्टत तथाहि देववाण्यां हिन्दीभाषायाञ्च रेखागणित बीजगणित खगोल भूगोलेतिहासज्यामितिरसायन विज्ञानादीनां नितान्तमभावमुपलक्ष्य महामहिमशालिभिरेभिरेकस्यानुवादात्मकस्यानुसन्धानविभागस्य प्रतिष्ठा दत्ता यस्याध्यक्षतापदं श्री एस. एम. चट्टोपाध्यायः कोऽपि वङ्गदेशीयः पण्डितोऽलञ्चकार। यस्याध्यक्ष्येऽनेके पण्डिताः मुह्मद उस्मान् प्रभृतयो मौलवी महानुभावाश्च कार्यरता अभूवन् येषु काश्मीरिक ईश्वरकौलः प्रारम्भे उपाध्यक्षतामाश्रित्यानन्तरमस्यविभागस्याध्यक्षो बभूव। अस्मिन्नेवानुवादविभागे पारस्यारब्याङ्ग्लबंगलाः भाषा विशिष्टग्रंथरत्नानामनुवादायायोजनमकारि। कलाशास्त्राण्यनूदितुमत्र सुमहान् प्रयासः कृतोऽभूत् विशेषतश्च अलोपैथी होमियोपैथी टिब ग्रन्थानामायुर्वेदीय ग्रन्थरत्नानां च भाषानुवादोऽऽप्यत्र पूर्णतां नीतः। किञ्चात्रोपलभ्यमानान् इतिहासग्रन्थाननूदितुं सफला योजनाऽऽयोजिताऽभूत् यस्यामारब्यसरासीमजातीयसाम्राज्यस्येतिहासानुवाद इतिहास दीप इति नाम्ना सुरभारत्यां निरमीयत। एतदतिरिक्तं पारस्यारब्य भाषा निबद्धानामितिहासग्रन्थानां प्रायेणात्र तवारीखि कन्धारी, तवारीख नादरी, तवारीख फरिश्ता तवारीख काश्मीर, तवारीख जहां इत्यादिनामभिस्तदानीम्प्रचलितायां पंजाब डोगरी सम्पृक्तायां हिन्दी भाषायामनुवादा निष्पादिताः। ये तावदत्र ग्रन्थाकारतया काश्मीर संग्रहालये हज़रतबले सुरक्षिताः सन्ति राजकुमाराणां दैनिक कार्यक्रम निमित्तं नव्यचण्डीदासमहोदयेनाह्लिकपद्धतिरप्यत्र प्राणायि इयं राजकुमारप्रतापसिंहस्य शिक्षार्थं प्रणीताभूदिति केषाञ्चिन्मतम्। या काश्मीरप्रत्न-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्याप्रकाशविभागेन सम्मुद्र्य प्राकाश्यं नीता । एतदाशयेनैव देविकोपकण्ठ-वासिभिर्विद्वद्वरकविगंगाराममहोदयै र्व्यवहारगीताभिधापराऽह्निकपद्धतिः स्वकृत भाषाटीका संवलिताप्यलेखि याचोपर्युक्तविभागेऽमुद्रितैव विराजते । किञ्च दाक्षिणात्यानां र० ना० सं० महाविद्यालय पण्डितानां श्रीवेंकट-रामशास्त्रिणां गंगास्रोतोनिरूपणात्मको महानिबन्धोऽप्यत्र समुपलभ्यते । श्रीरणवीरसिंहमहोदयश्चरमे वयसि प्रमेहरोगाक्रान्तोऽभूदिति तस्य संमूलोन्मूलनाय जम्मुदेशे एकं वैद्यसम्मेलनमायुयुजे । यत्र वैद्यानां सुप्रसिद्ध-भिषजां सम्पर्केण सहयोगेन फलेग्रहितामाधत्ते स्म यत्रैतद्रोग निरासाय विचारविनिमयोऽभूत् परिणामतः प्रमेहरोगविषये प्रोक्त महाराजवर्यैरेको बृहद्ग्रन्थो निर्मापितः यस्य भागनवकमुपरिनिर्दिष्ट संग्रहालये सुरक्षितं वर्तते । पशुचिकित्साविषयेऽश्वोपचारमधिकृत्यात्र शालिहोत्रस्य द्वादश भागाः सन्ति इत्थमेव लक्ष्मणशास्त्रिप्रणीतो भास्कराचार्य क्लृप्तस्य सिद्धान्तशिरोमणि ग्रन्थस्य भावगर्भितो भाषानुवादोऽप्यत्र दृग्गोचरी भवति तथा किमिस्ट्री विषयात्मकस्य ग्रन्थस्यानुवादो रसायनचन्द्रिका नाम्नात्र व्यधीयत । किञ्चाङ्गल्यामाङ्गलभाषायां प्रवृत्ताया कलाविद्यान्तर्गताया यान्त्रिक्या गृहनिर्माणसेतुनिर्माणविद्याया भाषानुवादोऽपि विशेषज्ञैरत्र कारितः किञ्च शेखसादिनः बोलानस्य पद्यानुवादस्तत्र भवद्भिरीश्वर कौलै धर्मेन्द्रनाथेन कृतानुवादात् 'पुष्पलोकात् प्राग् प्रायः दशोत्तरशत-वर्षेभ्यः पूर्वमेवात्ररचितः । मसदरनामा, निसाब-उलसिबयान् भुलिस्तान् प्रभृतीनामारब्य पारस्य भाषा संकलितानां पाठ्यग्रंथानां भावानुवादो संस्कृत हिन्दी भाषायामत्र क्लृप्तोऽभूत् रणवीरसागर, घृतसागर तैलसाग-रादयो चिकित्साग्रन्थाः उपरिनिर्दिष्ट विभागस्य तत्त्वावधाने प्रणीताः अभूवन् वनस्पतितत्त्वौषधिकोषाभिधे निघण्टौ च पौरस्त्य पाश्चात्यादि प्रणाल्या वनस्पतीनामोषधीनां परिभाषापूर्वकं विवरणं कृतमस्ति । बहु-भाषाविदा श्री ईश्वर कौलेन दशभाषाभिधोऽपूर्णोऽभिधानग्रंथोऽत्र व्यरचि । यत्रैकस्य शब्दस्य संस्कृत, हिन्दी, काश्मीरी, डोगरी, तिबटनलद्दाखी, बल्ती, अर्बी, फारसी दारदीनि भाषासु पर्यायाः दत्ताः सन्ति । अनु-षष्टि वाचकानां पारिभाषिक सैनिकशिक्षाविधिसूत्राणामादावेवोल्लेखः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्तोऽस्ति । श्यैनिक शास्त्रस्याश्व विद्याया वाजनामा, अस्पनामेति प्रसिद्धानुवादावप्यत्रोपलभ्येते । रिसालातीरन्दाजीत्यस्यापि भाषायामनुवादोऽत्र प्राप्यते एवमग्निविस्फोटक निर्माण प्रक्रियायामपि भाषाग्रन्थो लभ्यतेऽत्र । प्रोक्त नरेशमहानुभावैः श्रीमद्भगवद्गीताया उत्साहवर्धकं युद्धार्थबोधकमेकमभिनवं भाष्यं रणवीर समित् बोधिनीति नाम्नात्र कारितोऽभूत् यत्त्वद्याप्यमुद्रितमेव । यस्य भाषानुवादोऽप्यत्र दृश्यते एवमेव मौलाना इस्फहानकृतस्य सर्वधर्म तत्त्वसंग्रहात्मकस्य दबिस्तान् मजाहिब इति शीर्षकस्य रूपान्तरं भाषायामत्र विहितमस्ति । एवमेव धात्रीशिक्षाया अपि संकलनमत्र भाषायां दृश्यते । शिवग्रंथ, युद्धग्रंथ, विष्णुग्रंथ, देवी ग्रंथ, स्त्रीग्रन्थादयः पुराणेभ्यः संगृहीता अपूर्णाः एव दृष्टिपथमवतरन्ति । श्रीमतामेतत्तिरोहितं नास्ति यद्गतशताब्द्याः पूर्वार्धादेव बहवः पाश्चात्या विद्वांसोयात्रिणश्च काश्मीरान् समाजग्मुरेषु मूरक्राफ्ट, यंगहसबण्ड, पार्जीटर, जार्जकर्निघम ड्रिवज प्रभृतयो यात्रिणोऽतीव सुप्रसिद्धाः सन्ति । एभिः कश्मीरे सुचिरमुषित्वा देशस्यास्येतिवृत्ते सभ्यता संस्कृति विषये च सविशेषं पर्याप्तं ज्ञानञ्च प्रापि । ड्रिवज् महोदयेन विषयान्तरैः सार्धं काश्मीरस्य मातृकाणां परिचयोऽपि स्वीये यात्राविवरणे दत्तोऽस्ति । येन पाश्चात्या मातृकादि क्रेतारोऽत्रागत्य सभ्यतासंस्कृतिमूलकानि वस्तुजातानि तदानीं स्वर्णमूल्येन विक्रीय तानि स्वदेशं निन्युः येषु हस्तचित्राणि मुद्रा धातुप्रस्तर मूर्तिवास्तुकला चिह्नान्यप्यन्तर्भवन्ति । अथ तैः काश्मीरे यत्र तत्र भ्रामं २ गौणरूपेणेतरभाषाभिः सार्धं मुख्यरूपेण संस्कृतमातृकाः स्वर्णमूल्यविनिमयेन क्रीताः । एतत्प्रयोजनमुद्दिश्य पूर्वप्रत्यक्षरूपेण शर्मण्यदेशीयो विद्वान् डॉ० ब्यूलर महानुभावो मुनियुग वसुचन्द्रोन्मिते खिस्ताब्दे काश्मीरान् समाययौ । तदाप्रभृत्यनेके यात्रिणो यात्राव्याजेन सुदुर्लभप्रत्नवस्तुजातसंचयाय प्रकटमप्रकटं वा समाजग्मुस्तदानीन्तेऽत्र वेश्माकारेषु नौकागृहेष्वेव न्यूषुः यानि मानसबलोपान्ते पद्मसरस्तटेषु गान्धारबले च तिष्ठन्ति स्म तत्रैव प्रायेण तेऽस्थायिरूपेण निवसन्ति स्म । डॉ० ब्यूलरमहोदयेन घट्टात् घट्टं तीर्थात्तीर्थं नौकागृहेन अनन्तनागस्थ खनिबलात् खादनाविहारान्तं यावत् स्वकीया यात्रा निर्व्यूढा । एभिरत्र वर्षद्वयं स्थित्वा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काश्मोरिकैः सह सम्पर्कः स्थापितः। अथ तात्कालिकीं परिस्थितिं विज्ञाय कैश्चित् काश्मीरिक पण्डितैः सह सौहार्दपूर्णः सम्बन्धोप्यस्य जातः। फलतः तेभ्यो वास्तवेनमातृकाधिकारिणां परिचयं लब्ध्वा शारदाक्षर-लिखितमातृका संग्रहाय नितान्तं प्रायतत। कश्चिच्चाक्रीणात् इतश्च पद्मादिसरोवरस्था धीवरा गेहाद्गेहं ग्रामाद् ग्रामं प्रदेशाद् प्रदेशं खर्वटाद् खर्वटं भ्रामं-भ्रामं शारदामातृकाः सचित्रा अन्याश्च सञ्जगृहुः। यस्मात्ते स्वनौकास्थितपर्यटकेभ्यः सर्वोत्कृष्टेन मूल्येन क्रेतुं प्रभवेयुः। इत्थं ब्यूलर-महाशयेन राजस्थान जैसलमीर बेकानरादि देशेभ्योऽपि मातृकाः सङ्कलिताः सन्ति यासु शतद्वयादधिकं मातृकाः केवलं काश्मोरतः संकलिताः। यासु तिस्रः चतस्रः वा मातृकाः विहाय शेषं सर्वा मातृकाः संस्कृतांभारती-मेवावगाहन्ते। यासामविकलं विवरणं तदीये मुद्रिते यात्रावृत्ते Buhler Report (१८७८) समुपलभ्यतेऽस्मिन् विवरणेऽष्टशतादधिकं मातृकाणां संक्षिप्तं विवरणं सन्निविष्टमस्ति। ब्यूलरमहाशयेनापीतः स्वदेशं प्रस्थाय काश्मीरिक मातृकासम्पत्तिपरिज्ञानेन पश्चिमदेशः पश्चिममापादितः यज्ज्ञानानन्तरमनेके गवेषकाः पश्चिमतः काश्मीरानागत्येतस्ततः स्वोद्देश्य-पूर्तये शारदामातृका इतस्ततो भ्रामं भ्रामं सञ्चिक्युः। तदानीं काश्मीरेषु मरुत्तरबसादियानामनागमनेनानुपलब्धेश्च प्रचारो नाभूत्। अस्मादेव कारणात् घट्टात् घट्टं तीर्थात्तीर्थं ग्रामाद् ग्रामं नौकयाटद्भिः ब्यूलरमहा-भागैः काश्मीरमातृकाधिकारिणां सुसमीचीनतया परिचयमाप्य तेषां परिचर्यादिदान पुरः सरं स्वकीये यात्रा विवरणे सविस्तरं सर्वं वृत्तम-प्यलेखि। तदापि शारदादेशे आभ्यन्तरीयं यातायातमपि नौकाद्वारैव सम्पद्यते स्म। ब्यूलरमहानुभावानां सुयोग्योऽन्तेवासी डॉ० स्टीनमहाभागः तदानीं लाभपुरीय प्राच्यमहाविद्यालये प्रधानसंस्कृताध्यापकातिरिक्तं पञ्जावविश्वविद्यालयस्य प्रस्तोताऽपि बभूव। अथ शोधकार्यव्यापृतत्वादनेन संस्कृताध्यक्षपदेन सार्धं पं० विश्वविद्यालीयप्रस्तोतृपदमप्युज्झितम् स्वीया संस्कृतविभागाध्यक्षपदवी प्रो० वूलनर महोदयेभ्यः समर्पिता। अनन्तरमसौ स्वगुरुमहानुभावानामनुशिष्ट्या प्रचोदनयाच काश्मीरे मातृकान्वेषण-संचयादिकार्ये प्रवृत्तोऽभवत्। अनन्तरं मूरक्राफ्ट कलिकातामुम्बापुरी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुद्रित संस्करणानां राजतरङ्गिणी समालोचनानन्तरं काश्मोरेऽन्यत्र चोपलब्ध रा० त० मातृकानुसारञ्च स्टीन महोदयेन श्रीब्यूलरमहोदयस्य परामर्शेनानुज्ञया च राजतरङ्गिण्याः प्रामाणिकं संस्करणं सम्मुद्र्य प्रकाशितम् । अनेनापि काश्मीरे मातृकाणां निजः संग्रहो विहितः यस्त्विदानीं शर्मण्यदेशीयतुम्व्यन्ज्यन् पुस्तकालये सुरक्षितो वर्तते । यस्मिन् भृङ्गीशसंहितान्तर्गतं माहात्म्यसाहित्यं शर्वावतार आदिपुराणञ्चोल्लेखार्हाणि विद्यन्ते । एतच्चात्रावेदनमप्रासङ्गिकमप्रकृतञ्च न भवेत् यत् मातृका संचय परायणैः पाश्चात्यैः स्वसाध्यसाधनाय बहवः प्रतिनिधिरूपा अभिकर्तारो नियोजिता आसन् प्रायेण दाशजातीया नाव जना एव कर्मण्यस्मिन् व्यापृता अभूवन् इत्थं शर्मण्यजातजना अन्ये पाश्चात्यदेशीयाश्च गवेषकाः परस्तात् काश्मीरेऽभ्येत्य शारदामातृका (पाण्डुलिपि) निचयं प्रत्नसभ्यतासंस्कृतिशंसि (सूचकं) भावजातञ्च स्वर्णमूल्येन यथाकालमक्रीणन् । अथ कश्मीरे प्रतिशाखानगरं प्रतिग्रामं प्रतिखर्वटं प्रत्नपाण्डुलिपिप्रत्नवस्तुगवेषणाजो नादः सर्वतः सर्वत्राभूत् । अनेनैव हेतुनानेकैरविज्ञजनैः प्रत्नतत्त्वसम्बन्धीनि वस्तुजातानि चामुद्रिताभिर्मातृकाभिः सार्धमेव विक्रीतानि । यास्वतिदुर्लभाऽतिप्राचीना शारदाक्षरलिखिताकाठकसंहिताप्यन्तर्भवति या चैतर्हि शर्मण्यदेशस्थ तुम्व्यन्ज्यन् संग्रहालये सुरक्षिता वर्तते यस्याश्च छायाचित्रात्मकमेकं प्रतिलिपिपत्रं श्रीवेट्सेलरमहोदयेन मदभ्यर्णेऽतीताब्दे आदर्शरूपेण प्रहितम् । किञ्च श्री ब्लोमफील्ड महोदयेन शारदाक्षराङ्कितस्याथर्ववेदस्य याथातथ्येन छायाचित्रात्मिका सुप्राचीना प्रतिलिपिर्यथावदेव प्रकाशिताऽस्ति यस्या मूलभूतः प्रतिरूप आदर्श मातृकारूपेण काश्मीरत एवाधिगत आसीत् । इतश्च धर्मप्राणो दयामूर्तिः सुरभारती समुद्धारकः कश्यकाश्यपीन्द्रो महाराजो रणवीरसिंहः (१८५६-८७) शर्मण्याङ्गलादिपाश्चात्यैर्विलुण्ठितं प्रत्नग्रन्थराशिं विलोक्य नितरां खिन्नचेताः समभवत् ।

परिणामतः प्रधानामात्येन बाबू नीलाम्बर मुकर्जी महोदयेन सार्धं विषयेऽस्मिन् परामृश्य वैदेशिकेभ्यः स्वेच्छया मूल्येन वा मातृका प्रदानं सर्वथा सुगुप्तं निषिषेध ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ श्रीरणवीर भूभुजा मातृका पुस्तकालयोद्घोटनस्यायोजनं विमृष्टम् । यत्र तदानीमुपलभ्यमाना मातृकाः सुरक्षिता स्युरिति विमृश्य वाराणसीजयपुरालवर काश्मीर राज्येभ्यः प्रचुरधनव्ययेन पाण्डुलिपीनां संग्रहोऽक्रियत अस्मै प्रयोजनाय स्वकीये राज्ये काश्मीरदेशे श्री दिल्लारामः मातृकाणां संचयाय महाराजादेशेन संलग्नोऽभूत् । अस्यैवाध्यक्षतायां सुचारुरूपेण श्रीनगरे लिपिकार्यमभ्यारब्धमस्मिनायोजनेऽस्य सहकारिणः स्वसूनुना साहिब्रामेण सहान्ये राजारामदयारामसुदर्शनराजानक पण्डित बलकाक प्रभृतयो विद्वांस आसन् रणवीरानुसन्धानविभागायत्तमेव लिपिकार्यं सम्पद्यते स्म । श्री महाराजरणवीरस्यार्थिक साह्येनैषां पण्डितानाञ्च सहयोगेन संकलितानां पाण्डुलिपीनां श्रीनगरे प्रतिलिपिकर्म समारब्धमभूत् प्रोक्तमहाराजवर्यैर्जयपुरीयो ब्रजलाल महोदयः बङ्गीयो राममोहन भट्टाचार्यवर्यः काशिक आशानन्दादयः स्व स्व प्रान्तेभ्यो मूल्येन मातृकासंग्रहाय सम्प्रेरिताः। अथ सुचारुतया मातृका संग्रहे सम्पन्नेऽसौ सुतिथौ निज सचिवादिसहकारिणां सहयोगेन रघुनाथमातृका पुस्तकालयं प्रतिष्ठापयामास । यैः जनिमाप्य समस्त भारते संस्कृत महार्घमयमातृकाणां प्रतिष्ठानमस्ति यत्र वेद वेदाङ्गकाव्यनाटकालङ्कार पुराण ज्योतिषचिकित्सा व्याकरण मीमांसा संगीत कर्मकाण्डादिविषयेषु सार्धं चतुः सहस्राणां मातृकापाण्डुलिपीनां संग्रहोवर्तते। अस्य रघुनाथ मन्दिरस्थ मातृका पुस्तकालयस्य सविवरणं वृहत् संवेदनात्मकं सूचीपत्रं तत्र भवता स्टीन महोदयेन निर्माय लोजाको लन्दनतः तथा लीपजीग हारसनिटजतो यौगपद्येन प्रकाशितम् याश्चात्र सुरक्षिताः सन्ति याभिर्देश विदेशीयाश्चानुसन्धित्सवो लाभान्विता भवन्ति प्रतिवर्षम्। अस्मिन् पुस्तकालयेऽद्यापि मातृकाणां त्रिशती ह्यमुद्रिता वर्तते। एवमनुश्रूयते श्रीप्रतापप्रभूणां शासनस्य प्रथमाब्दे एवायमनुसन्धानात्मकोऽनुवादविभागस्तदीयानुशिष्ट्या विलयं प्रापितः । इत्थं तेन पण्डितजन समाजे सर्वतः हाहाकारोऽजनि । विपश्चिदपश्चिमा अपि पाश्चात्या विबुधा अपि श्री प्रतापसिंहस्यालोचनाञ्चक्रुः कर्मणेऽस्मै तं जगर्हिरे। किञ्चासौ एशिया द्वीपे विशालस्य राजविहारस्य सुघटितं शिलोच्चयं शर्करं कर्करात्मना परिणमयितुमादि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देश। येस्तदानीं जी. वी. मार्गस्य परिष्कार पूर्वकं निर्माणमभूत्। एतत्कार्य द्वय समारम्भेण तदानीमनुसन्धित्सुः डॉक्टर स्टीन महोदयोऽपि श्री प्रताप प्रभुभ्यो भृशं चुकोप। देहल्यां भारत सर्वकारस्य प्रतिनिधेः समक्षं कौलीनञ्चकार परिणामतश्च श्रीप्रताप प्रभुः समन्ततः प्रसृतं प्रवृतञ्च कौलीनजं प्रवादं शमयितुं द्व्यधिके एकोन विंशतितमे खिस्ताब्दे प्रत्नमातृकाणां रक्षणाय प्रकाशनाय च नव्यं भव्यमेकं कार्यालयमुद्घाटयामास। यः प्रारम्भे रिसर्च इन्स्टीट्यूट अनन्तरं रिसर्च डिपार्टमेंट रिसर्च एण्ड पब्लिकेशन्स डिपार्टमेंटइति नामभिः ख्यातिं लेभे। उपक्रमेऽस्याध्यक्षतां बङ्गदेशीयः श्री जे. सी. चट्टोपाध्याय अलञ्चकार। कार्यालयोऽयमनेकान् सर्वकार कृपाजनितान्तिरोभावाविर्भावादीननेकशः विषेहे। अधुनाऽपि निष्क्रियतामापादितोऽयमन्तिमान् दिवसान् का० विद्यालयस्थ पुस्तकालयभवने गमयति। अथातीतेऽनुपूर्व्या अस्याध्यक्षाः महामहोपाध्यायमुकुन्दशास्त्रिहीरानन्द काकरामचन्द्र कौल मधुसूदन जाडू जगद्धर खजांची त्रिलोकीनाथसाहिबजादा हसन शह काचरु श्रीधर ठाकुर गोवर्धन सिंह पुष्प पृथ्वीनाथादयो बभूवुः। येषामाध्यक्ष्ये कार्यकाले च जाडू जगद्धरस्याध्यक्षतां यावत् सप्ताशीति प्रकाशनानि कार्यालयेनानेन प्रकाशितानि किञ्च षट्त्रिंशदधिकैकोनविंशतितमे खिस्ताब्दे पारस्यारब्य भावानुसन्धान कृत्यस्य समावेशस्तदानीं गृहमन्त्रिणां वजाहत हुस्सैन महोदयानां परामर्शेनाभूत् यस्य कार्यमद्यत्वेऽपि प्रवर्तते। प्रकाशनेषु प्राथम्येन प्राधान्येन शैवग्रन्था एव कार्यालयादस्मात् सम्मुद्र्य प्रकाशिता सन्ति। पूर्वं प्रथम प्रसूनरूपेण शिवसूत्रविमर्शिनी अनन्तरं परात्रिंशिका, ईश्वर प्रत्यभिज्ञा उत्पलदेव रचिता अभिनव कृतविमर्शिनी भूषिता अस्मादेव कार्यालयात् प्रकाशिताः सन्ति। अत्र लुप्तप्रायाया ईश्वर प्रत्यभिज्ञाविवृतेरभिनवकृता विवृतिविमर्शिनी खण्डत्रयेषु प्रथममत्र प्रकाशितास्ति अस्मादेव कार्यालयात् शैवशास्त्रसम्बन्धि विशालं तन्त्रसाहित्यं मुद्रितं विराजते। यत्र तन्त्रालोक, तन्त्रसार स्वच्छन्दतन्त्र मृगेन्द्र तन्त्र नेत्रतन्त्र गन्धर्वतन्त्रप्रभृतयो ग्रन्थाः संमुद्र्य प्रकाशिताः सन्ति। किञ्च स्पन्दनिर्णय स्पन्दकारिका शिवदृष्टि षट्त्रिंशत्तत्वसन्दोह जन्ममरणविचार वाम-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केश्वरमतविवरण प्रभृतीनि ग्रन्थरत्नानि कार्यालयादस्मादेव समये ८ प्रकाशितानि सन्ति बृहत्कलेवरात्मकस्य विद्यार्णवतन्त्रस्य देवी रहस्यस्य च सर्वप्रथमतया प्रकाशकोऽयमेव कार्यालयो वर्तते। उभावेवेमावप्राप्यौ जातौ। गिलगित प्रदेशे समुपलब्धाया कालिकातास्थ विश्वविद्यालयीय तिब्बतन विभागाध्यक्षाणां तत्रभवतां नलिनाक्षदत्त महोदयानां सम्पादकत्वे मुद्रिताया बौद्धग्रन्थावलेः गिलगित मैनुस्क्रिप्टस इति ख्याताया: प्रकाशकोऽमेव कार्यालयः।

श्रीनगर्यां कादाचित्कतया ब्राह्मणसमितेर्मण्डलस्यच सनातनधर्मार्यसमाजस्य प्रचारेण संस्कृताध्यायन विषये मन्दोत्साहोऽपि दरीदृश्यते स्म। अधुना ब्राह्मणमण्डल तत्त्वावधानेऽप्यक्रियात्मको वाङ्मात्रगोचरः प्रचारोक्रियतक्रियते च। तत्रभवद्भिर्भूतपूर्व स्वास्थ्यविभागाध्यक्षैर्दिवङ्गतैः श्री डा० कुलभूषण महोदयैः संस्कृतसाहित्यपरिषदस्तत्वावधाने प्रकाशिता सम्पादिता त्रैमासिकी श्रीपत्रिका वर्षनवकंयावत् नियमेन प्रावर्तत प्रासरच्च। याधुना डा० कुलभूषणानां वृत्तिविरमेण सार्धं चिराल्लुप्तास्तिभूतपूर्वलेखाधिकारिभिर्लेखाविभागाध्यक्षैः दरिन्दोपाह्वश्रीपरमानन्द महोदयैः संस्कृतशिक्षाणायप्रतिष्ठापितमपि काश्मोरिकपण्डितानां संस्कृतिमूलकं संस्कृतं प्रत्यौदासीन्योपेक्षाभावेन श्री शारदापीठमधुना (हायर सिकण्डरी स्कूले) इंग्लिशमाध्यमिकविद्यालये परिणतमस्ति। किञ्चाद्यत्वे विज्ञानस्य प्रचुर प्रचारत्वात् त्रिचतुरो महाविद्यालयान् विहाय न कुत्रापि संस्कृतं पाठ्यते माध्यमिकीषु इंग्लिशपाठशालासु संस्कृताध्ययनाध्यापन प्रबन्धोऽद्यत्वे राजप्रजोभयप्रोत्साहनाभावात् न दृश्यते द्वित्रिदशाब्दीतः पूर्वं संस्कृतमांगलिक नान्दी पाठेनैव दैनिकः पाठक्रमः मुख्येषु विद्यालयेषु प्रारभते स्म। तदानीमपि कतिपये बालाः पुरोहित वर्गस्था एव वृत्तिहेतोः संस्कृतमीयते स्म अधुना समाजे जायमानामवहेलनां वृत्तिभङ्गञ्च वीक्ष्य तैरपि परम्परागतः प्राचीन अध्ययनक्रमः सर्वथा प्रोज्झितोऽस्ति। अथ दैवशारदादेशोद्भवां शारदां वीक्ष्यकस्य सचेतेसो हृदयं न दुनोति शतधा न विदीर्यते समय एव करोति बलाबलमित्याभाणकेनाश्वास्य कथञ्चिद्विरम्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संहिता तदन्तर्गत ध्वनि प्रक्रिया

—श्री शिवकुमार मिश्र

भाषा अनुकरण से अर्जित को जाती है। अनुकरणशील प्राणी होने पर भी मनुष्य भाषा का यथावत् अनुकरण नहीं कर पाता है। यह सिद्धान्त न्यूनाधिक रूप से समर्थ एवं असमर्थ - दोनों हो प्रकार के उच्चारयिता के साथ चरितार्थ होता है। इससे भाषा में महान् परिवर्तन आ जाते हैं। मनुष्य का एक यह भी स्वभाव है कि वह अल्पतम प्रयास से अधिकतम लाभ उठाना चाहता है। भाषार्जनकाल में मनुष्य अपने इस प्रयत्नलाघव अथवा मुख-सुख की प्रकृति का पूरा लाभ उठाकर भाषा में जानबूझकर भी परिवर्तन कर देता है।

असमर्थ उच्चारयिता उच्चारण-सौविध्य के लिए कभी तो शब्द की एक या अनेक ध्वनियों को छोड़ देता है, कभी उसमें अतिरिक्त ध्वनि जोड़ देता है, कभी एक या अनेक ध्वनियों को विकृत कर देता है तथा कभी ध्वनियों का परिवर्तन कर देता है। जब विद्वज्जनों द्वारा इन विकृत शब्दों को आदर प्राप्त हो जाता है, तब वे समग्र विकृत परिवर्तन साधु बन जाते हैं। फिर व्याकरण उन समस्त विकृत अथवा अविकृत शब्दों की व्याख्या करता है और तब वे समस्त अनियत परिवर्तन भी नियत बन जाते हैं। भाषा की यही सहज प्रवृत्ति एवं प्रकृति है। असमर्थ वक्ता "स्थान" को "थान" "स्नान" को 'अस्नान" तथा "दधि" को "दही" उच्चारित करता है। "थान", "अस्नान" तथा "दही" क्रमशः लोप, आगम तथा आदेश के उदाहरण है। यद्यपि ये परिवर्तन सहज अतएव यादृच्छिक तथा अनियत हैं तथापि ये अनियमित नहीं है। इन परिवर्तनों में अधि-सँख्य परिवर्तनों के अन्तर्गत भाषा-शास्त्र के निश्चित नियम कार्यशील हैं।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समर्थ वक्ता शब्दों को यथावत् उच्चारण करने का प्रयत्न करता है। बहुत अंश तक वह अपने प्रयत्न में सफल भी होता है, किन्तु वक्ता जितना भी समर्थ क्यों न हो, चाहे जितनी भी चेष्टा क्यों न करे उस पर क्षेत्रीय और मातृभाषा का प्रभाव पड़े बिना रह नहीं सकता। भाषा-प्रवाह में यह संभव भी नहीं है। एतदतिरिक्त भाषा की द्रुततरवृत्ति में वर्ण एक दूसरे को ठीक उसी प्रकार प्रभावित करते हैं जैसे दो रक्त रुचकों (शीशे) के मध्य श्वेत शीशे में भी ईषत् रक्तता आ जाती है। इससे भी ध्वनियों में परिवर्तन दृष्टिगोचर होते हैं। यदि ऐसा नहीं होता तो न तो वेद की इतनी शाखायें होतीं और न ही आज अनेक भाषाएँ दृष्टिगत होतीं। प्रातिशाख्यों एवं व्याकरण-ग्रंथों में आख्यात वैकल्पिक प्रयोग भी इस तथ्य के पुष्ट प्रमाण हैं।

जिस प्रकार स्थान, प्रयत्न (बाह्य तथा आभ्यन्तर) एवं काल के भेद से ध्वनियों के उच्चारण में भेद या परिवर्तन हो जाते हैं, उसी प्रकार दो वर्णों के परस्पर अत्यन्त निकटतया उच्चारित होने पर उनके उच्चारण में भेद हो जाते हैं। पृथक्-पृथक् वर्णों के उच्चारण में तो ध्वनियाँ अपने वास्तविक रूप में उच्चारित तथा श्रुत होती हैं, पर वे ही द्रुततर वृत्ति में गाढ़तम सान्निध्य के कारण अपने वास्तविक रूप से भिन्न रूप में उच्चारित तथा श्रुत होती हैं। इसका कारण यह है कि अविच्छिन्न प्रवाह में एक साथ दो विभिन्न प्रकृति की ध्वनियों के उच्चारण में वक्ता को असुविधा होती है। यह एक ध्वनि शास्त्रीय तथ्य है कि प्रथम ध्वनि के अघोष ध्वनि भी तथा द्वितीय ध्वनि के सघोष होने पर पूर्ववर्ती अघोष ध्वनि भी इसी वर्ग की सघोष ध्वनि में परिवर्तित हो जाएगी। यथा, दिक्गजः दिग्गजः, अब्जम् इत्यादि। क्रमागत दो महाप्राण ध्वनियों का उच्चारण भी दुष्कर है। इस स्थिति में पूर्ववर्ती ध्वनि स्ववर्ग के तृतीय वर्ण अर्थात् अल्प प्राण में परिणत हो जाती है। यथा, लभ्+धः=लब्धः, दोग्धा इत्यादि। इसी प्रकार परवर्ती ध्वनि के अनुनासिक होने पर पूर्ववर्ती अल्पप्राण स्पर्श-ध्वनि सवर्गीय अनुनासिक हो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जाएगी । यथा तद् मात्रं तन्मात्रं इत्यादि । नैरन्तर्यातिशय के कारण वर्णों के इसी रूप-परिवर्तन को "संहिता" कहते हैं ।

संहिता के स्वरूप का लक्षण निरुक्त, सभी प्रातिशाख्यों तथा अष्टाध्यायी में किया गया है। इनमें निरुक्त का लक्षण अत्यधिक पुष्ट है, अतएव भाषा वैज्ञानिकों द्वारा अभ्यर्थित है। ऋक् प्रातिशाख्य में कहा गया है कि काल का व्यवधान किए बिना जो पदान्तों का पदादियों के साथ मेल कराती है वह "संहिता" है।[१] यह लक्षण पुष्ट इसलिए नहीं कहा जा सकता है, क्योंकि संधि स्थलों में भी काल का व्यवधान तो होता ही है, भले वह व्यवधान अत्यल्प ही क्यों न हो । तै० प्रा०[२] तथा वा० प्रा०[३] के मत समान ही हैं। तदनुसार एक श्वास में उच्चारित होने वाले वर्णों का मेल "संहिता" कहलाता है। निरुक्त तथा अष्टाध्यायी में संहिता का लक्षण समान ही दिया गया है।[४] तदनुसार वर्णों का अतिशय सन्निकर्ष "संहिता" है। "संहिता" पद का व्युत्पत्तिलभ्य अर्थ भी इसका संकेत देता है। संहिता का अर्थ है—सम्यक् अवस्थान (सम्√धा+क्त+टाप्)। उपस्थित प्रसंग में यह सम्यक् अवस्थान है—वर्णों, अक्षरों अथवा पदों का। ऋक्तंत्र में लक्षण तो निरुक्त एवं अष्टाध्यायी के समान ही दिया गया है,[५] पर उसकी वृत्ति में कुछ चौंकाने वाले तथ्यों का उद्घाटन किया गया है। ऋक्तंत्र भी वर्णों के नैरन्तर्यातिशय को ही संहिता स्वीकार करता है, पर निरुक्तकार एवं सूत्रकार जहाँ वर्णों की सन्निकर्षता में विकार अवश्यम्भावी स्वीकार नहीं करते है, वहाँ ऋक्तंत्रकार वर्णों, अक्षरों अथवा पदों की सन्निकर्षता में वर्णादिकों में विकार (ध्वनि-परिवर्तन) अवश्यम्भावी स्वीकार करता है।[६]

१. ऋ० प्रा० २.२ पदान्तान्पदादिभिः संदधदेति यत्सा कालाव्यवायेन ।
२. तै० प्रा० ५.१ अथ संहितायामेकप्राणभावे ।
३. वा० प्रा० १.१५८ वर्णानामेकप्राणयोगः संहिता ।
४. निरुक्त १.६ तथा अष्टा० २.१.१०६ परः सन्निकर्षः संहिता ।
५. ऋ० तं० सू० ६७ सन्निकर्षः संहिता ।
तदेवम् एकसम्बन्धेन एकधर्मावच्छिन्ने अन्वयत्वरूपधर्मस्य सहार्थसाहित्य-चार्थसाहित्ययोरुभयोरपि विद्यमानत्वेन इयता अंशेन तयोः साम्येपि निम्ननिर्दिष्टप्रकारेण वैषम्यमप्यस्त्येव । तथा च तयोर्वैषम्यम्—

१. चार्थसाहित्ये परस्परं मिलितयोरेव धवखदिरयोरन्यत्र छेदनादावन्वयः । न तु स्वतन्त्रयोः । तथाचोक्तम्मनोरमायाम्—मिलितस्येतरान्वयः स तथाभूतोस्य द्वन्द्वस्य विषय इति ।

२. धवखदिरौ छिन्द्धि इत्युक्ते उभयोः समानकालिकमेव, समानदेशभवमेव छेदनमावश्यकमिति न गम्यते, उभयोश्छेदनमेव करणीयमेवेत्येतावन्मात्रमेव तस्माद् वाक्यादवगम्यते ।

१. सहार्थसाहित्ये तु पुत्रेण सह आगतः पिता, तिलैः सह माषान्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वपति इत्यादौ समानकालिकस्यैवागमनस्य, समानदेशभवस्यैव वापस्य बोधः ।

२. पितापुत्रयोः परस्परं निरपेक्षयोरेव गमनक्रियादावन्वयः, न तु परस्परं मिलितयोरिति ।

धवखदिरौ इति द्वन्द्वे उद्भूतावयवभेदसमूहे पूर्वं धवखदिरयोरन्वय-स्तदनन्तरमितरस्मिन् क्रियादावन्वयः । पुत्रेण सहागतः पितेत्यत्र तु परस्पर-निरपेक्षयोस्तयोः क्रियादावेवान्वय इति विशेष इति विज्ञेयं विद्वद्भिरिति संक्षेपः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कालिदाससर्वस्वे रामायणानुवर्तिता

डा० जयश्रीः चट्टोपाध्याय

रामायणं नाम अखण्डं पुण्यानां फलम्, यद्वशाद्रसलोकमुपनीता सुधियः सततं मोदन्ते। अतोऽस्य काव्यस्य प्रभावः सर्वस्मिन्नपि संस्कृत-साहित्ये नूनं दुष्परिहरः। निपीय रामायणरसामृतं वेद्यान्तरस्पर्श-शून्या रसिकाः कालिदासादयः काव्यस्यास्य प्रक्षिप्ताप्रक्षिप्तनिरूपणे सुत-रामासन् पराङ्मुखाः। रामायणमखिलं वाल्मीकिसृष्टमिति निश्चित्य ते काव्यादस्मात् स्वकीयं काव्योपादानं सादरमुपचिन्वन्ति। महाकविरपि कालिदासो नैवानृणः काव्यसृष्टौ स्वयम्भूरिव स्वतन्त्रो जातः। न केवलं रघुवंशे, वाल्मीकिकृतवाग्द्वारे अपारे काव्यसंसारे साडम्बरमस्य प्रवेशः सचेतसां विस्मयमावहति। रामायणीयधारा कुत्रचित् प्रत्यक्षायमाणा कुत्र वा फल्गुरिवान्तः सलिला तत्काव्ये प्रवहति। अतोऽयं श्रुतकीर्तिः स्वमनसो मधुरिम्णा नायिकां नोद्वीक्षते, तत्रापि रामायणसर्वस्वभूता जनकतनया स्वमहिमच्छायया सञ्चरते। कालिदाससर्वस्वे अभिज्ञान-शाकुन्तलेऽपि नैवास्ति व्यतिक्रमः। निसर्गकन्या शकुन्तला यद्यपि कालि-दासकपोलोद्भवा तथापि नेयं स्वतन्त्रा स्ववैशिष्ट्यं लालयति। कण्वतपो-वनमस्या आत्मीयवत् रमणीयं प्रतिभाति। वनवृक्षलतास्वस्याः सोदर-स्नेहः। अतः खलु वनज्योत्स्नाया विस्मरणमस्याः आत्मविस्मृतेः समान-मिति स्वमुखतः स्वीकरोति सा—'तदा अत्ताणं विविसुमरिस्सं। शकुन्तलाया मधुरं चरित्रं निबिडवनच्छायायां माधवीमञ्जरीभिर्व्याप्तं विकसितं च। तस्याश्च स्नेहलालित्यमासाद्य चेतनाचेतनयोरात्मीयता विदुषां सुखाय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्पद्यते। जानकी नदीनिर्झरेष्वस्या अनुरागं सकृदपि न जहाति, यदाह रामः—

गोदावरीयं सरितां वरिष्ठा
प्रिया प्रियाया मम नित्यकालम्। ३।६३।२३

वनवीक्षणमोहितेयं वनमागत्य उन्मादिनीव विहरति—
प्रियकाननसंचारा वनोन्मत्ता च मैथिली। ३।६२।२५

राज्यैश्वर्यसुखेनापीयमपरितुष्टात्मनः सर्वदुःखनिदानमरण्यमन्तरेण बहुमन्यते। दोहदवासनायामप्यस्या अरण्यं प्रति तृषार्तं मनो धावति। शान्तरसास्पदं तपोवनमस्या मनसि दूरागतं सुखस्वप्नं सञ्चार्य स्वीयेन माधुर्येणाप्रतिमं प्रतीयते, यदाह तपोवनमुग्धा—

तपोवनानि पुण्यानि द्रष्टुमिच्छामि राघव। ७।४२।३३

निसर्गप्रकृत्या मानवप्रकृतेर्यस्तावत् सम्बन्धो मधुरतमाय कल्पते, रामायणं तत्रोत्सरूपेण उपचरति। रामायणस्य मधुगन्धिवनच्छायामाश्रित्य शाकुन्तले तपोवनभूमिरपि धन्या पुण्या चालोककामान्यं मदिमानमवगाहुते। सीतेव वनचारिणी शकुन्तला तपोवनस्नेहच्छायायामाबाल्याद् वर्धिता। तद् विरहे तपोवनस्यापि दुःखं दुःसहं जायते। पतिगृहं गन्तुमतितरामुत्सुका शकुन्तलापि पतिगृहगमनरोमाञ्चमात्मनि स्वादयन्ती भूयोऽपि तपोवनदिदृक्षां हातुमसमर्था—'ताद, कदा णु क्खु भूओ तवोवणं पेक्खिस्सं" नायिकारूपनिर्माणदक्षोऽपि कविकालिदास आदिकवेरनुवर्तितां न जहाति। यद्यपि सीताया बाहू कोमलविटपानुकारिणौ न स्तस्तथापि कान्तिरस्या स्निग्धपल्लवसंकाशा लोकलोचनानां प्रीतिमादधाति—

स्निग्धपल्लवसंकाशां पीतकौशेयवासिनीम्।
शंसस्व यदि सा दृष्टा विल्व विल्वोपमस्तनी॥ ३।६०।२३

न केवलमियं जनकदुहिता, सुमित्रापि प्रसङ्गत उल्लेखमर्हति। पतिपुत्रविरहदशायामस्या वाच अनभ्युदितः शोकः पुष्परिवतकर्णिकार-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शाखायाः शून्यतामाश्रित्य सजीवः प्रतीयते। महाघोरे संसारारण्ये पतिपुत्रविरहितेयं शीर्णपुष्पा कर्णिकारशाखेव रिक्ता रसहीना—

इयं सुमित्रा दुःखार्ता देवी राज्ञश्च मध्यमा।
कर्णिकारस्य शाखेव शीर्णपुष्पा वनान्तरे।।२।९२।२३

फलपुष्पलताशाखाभिः नारीणामुपमाचयने रामायणरचयितुरनुवर्ती कालिदासः। शकुन्तलाया रूपमालोक्य दुष्यन्तोऽचिन्तयत्—

दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः। २।२७

केसरवृक्षपरिगतामिमामालोक्य प्राह प्रियम्वदा—'जाव तु ए उवगदाए लदासनादो वि अ अ अं केसररुक्खओ पडिभादि।'

सीताहरणकाले वृक्षानालिङ्गन्तीमिमां लतामिवाससाद रावणः—

तां लतामिव वेष्टन्तीमालिङ्गर्ती महाद्रुमान्।
मुञ्च मुञ्चेति बहुशः प्राप तां राक्षसाधिपः। ३।५२।७

कौशेयवासिनी सीता रूपार्चिषा विद्युदिवालोकसामान्या—

रराज राजपुत्री तु विद्युत् सौदामनी यथा। ३।५२।२४

शकुन्तलापि वल्कलवासिनी प्रभातरलज्योतिरिति शब्दसौष्ठवादचिरांशुविलासचञ्चला तडिदिव मनोहारिणी। हरिणनयना शकुन्तला, यदाह दुष्यन्तः—

अत्यन्तमेव सदृशेक्षणवल्लभाभि-
राहो निवत्स्यति समं हरिणाङ्गनाभिः ।। २।२६

मृगीवोत्फुल्लनयना सीतापि सहृदयानां हृदयातिथ्यमसकृत् सम्भजते। मृगसन्निधावेव मृगनयनाया भार्याया अन्वेषणमकरोत् रामः—

अथवा मृगशावाक्षीं मृग जानासि मैथिलीम्।
मृगविप्रेक्षणी कान्ता मृगीभिः सहिता भवेत्। ३।६०।२३

न केवलं शकुन्तलाया रूपकल्पनायामेव, एतस्या विरहे तपोवनेषु विधुरविषण्णतामालिखन् कविकालिदासो रामायणादेवालेख्यमाहृत्य स्व-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काव्यभावनां परिपोषयति। पतिगृहगामिनीं शकुन्तलां मातृहीनो मृगपोतो बाधते—

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते॥ ४।२४

सीतापि रामायणे मृगेषु सख्यानुबद्धचित्तासीत्। सीताशून्ये अरण्ये एषामपि मृगशिशूनां भाषाशून्यं दुःखं राममुखाद् वाङ्मयतामधिगच्छति—

यैः परिक्रीडसे सीते विश्वस्तैर्मृगपोतकैः।
एते हीनास्त्वया सौम्ये ध्यायन्त्यस्राविलेक्षणाः॥ ३।६२।५

सीताविरहात् वृक्षपुष्पमृगपक्षिभिः शून्योटजस्य हाहाकारो रामस्याकुलविषण्णताम् आलिंग्य चेतनाचेतनयोः समदुःखभागितामुपपादयन्ननन्यसामान्यचमत्कारितामुपायनीकृत्य चिराय विश्वसाहित्ये संस्कृतस्यासपत्नप्रतिष्ठामुद्घोषयति। उटजस्थानं तत्र—

रुदन्तमिव वृक्षैश्च ग्लानपुष्पमृगद्विजम्।
श्रिया विहीनं विध्वस्तं संत्यक्तं वनदैवतैः॥ ३।६०।६

शकुन्तलामापृच्छमानानां मृगाणां मुखात् तृणमुद्गलति, मयूराणां सहसा नृत्यभङ्गो जायते—

उग्गलिअ दब्भकबला मिआ परिच्चत्तणच्चणा मोरा।
ओसरिअ पण्डुपत्ता मुअस्ति अस्सू विअ लदाओ॥ ४।१२

अत्रापि दृश्यते रामायणानुकारिता। रामविरहे अयोध्यानामियमेकावस्था करुणस्य सञ्चारिणीं मायामवलम्बते—

व्यसृजन् कवलान् नागा गावो वत्सान् न पाययन्।
पुत्रं प्रथमजं लब्ध्वा जननी नाभ्यनन्दत॥ २।४१।२०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शकुन्तलाया विरहातुरा मूर्तिर्या श्लोकेनैकेन कालस्य मर्माधिकृत्य शाश्वती प्रतीयते—

वसने परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्ति ।। ७।२१

तत्रापि सैका जानकी शरीरिणी विरहव्यथेव सञ्चरति--
मलिनेन तु वस्त्रेण परिक्लिष्टेन भामिनीम् ।
संवृतां मृगशावाक्षीं ददर्श हनुमान् कपिः ।। ५।१७।२६

एकवेणी धरा दीना त्वयि चिन्तापरायणा ।
अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे । ५।६५।१४-१५

अपापविद्धा शकुन्तला यज्ञे पूर्णाहुतिरिवात्मानमुपायनीकरोति—
"दिट्ठि आ घूमाऽलिददिठ्ठणो वि जअमाणस्स
पाअए एव्व आहुदी पडिदा ।"

वाल्मीकिकाव्ययज्ञे सीतापि वीतकल्मषा पूर्णाहुतिरिवाग्नौ समर्प्यमाणा दृश्यते—

ददृशुस्तां महाभागां प्रविशन्तीं हुताशनम् ।
ऋषयो देवगन्धर्वा यज्ञे पूर्णाहुतीमिव ।। ।६।११६।३३

अभिज्ञानशाकुन्तलस्य पञ्चमाङ्केऽपि रामायणगतं साम्यमविरलमेवास्ते—

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा
निषेवते श्रान्तमना विविक्तम् । ५।५

इत्येवं दुष्यन्तवर्णनं प्रजावत्सलं राममेव मानसातिथ्यं प्रापयति—

अवेक्षमाणः सस्नेहं चक्षुषा प्रपिबन्निव ।
उवाच रामः सस्नेहं ताः प्रजाः स्वाः प्रजा इव ।। २।४-५।५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रावणस्य विवशाकूतिर्यादृशं रूपकल्पमाश्रित्य सहसावतरति—

मनो हरसि मे रामे नदीकूलमिवाम्भसा ॥ ३।४६।२१

तमेव व्यवहरति दुष्यन्तः शकुन्तलामाक्षेप्तुम्—

व्यपदेशमाविलयितुं किमीहसे जनमिमं च पातयितुम् ।
कूलंकषेव सिन्धुः प्रसन्नमम्भस्तटतरुं च ॥ ५।२१

शष्पश्यामच्छाययावृतः कूप इव भयङ्करो रावणश्चित्रामिव शनैश्चरः सीतामुपतस्थे—

अभ्यवर्तत वैदेहीं चित्रामिव शनैश्चरः ।
सहसा भव्यरूपेण तृणैः कूप इवावृतः ॥ ३।४६।२०

अवमानिता प्रत्याख्याता शकुन्तला तृणावृतकूपस्येव दुष्यन्तस्य भीषणतां सक्रोधमाविष्करोति को दाणिं अण्णो धम्मकञ्चुअप्पवेसिणो तिणच्छन्नकूवोवमस्स तव अणुकिदिं पडिवदिस्सदि ।

किं बहुना, पति परित्यक्तेयं सर्वथा निरवलम्बा सीतेव वसुधां शरणं याचते—

'मअवदि वसुदे देहि मे विवरं ।'

कीर्तिश्रद्धाप्रभृतिभिर्विमूर्तैर्गुणैर्नायक नायिकादीनामुपमाचयने वाल्मीकिरेव पथिकृत् प्रतिपद्यते । अशोकवनिकायामवसन्ना कीर्तिरिव, खण्डिता श्रद्धेव, प्रतिहता आशेव, क्षयोन्मुखी प्रज्ञेव जनकात्मजा शोकानुशोकपरम्परया सवासनानां सभ्यानां हृदयं मथ्नाति—

सन्नामिव महाकीर्तिं श्रद्धामिव विमानिताम् ।
प्रज्ञामिव परिक्षीणामाशां प्रतिहतामिव ॥ ५।१६।२२

एवं विधैर्विमूर्तैर्गुणैरसकृत् शाकुन्तलेऽपि उपमाचयनं परिलक्ष्यते । कदाचिदस्याः शकुन्तलाया रूपमखण्डपुण्यानां फलं भवति, कदाचित्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रद्धायाः शुद्धविग्रहरूपेणावतरति मानसम्, यदाह मारीचः—

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम् ॥ ७।२९

कालिदासीयकल्पनायां सुशिष्यपरिगता विद्येव दुष्यन्तपरिणीता शकुन्तला प्रतिभाति । प्रियम्वदाया मुखादेवं वयं कण्वपरितोषमवगच्छामः—"वच्छे, सुसिस्सपरिदिण्णा वि अ विज्जा असोअणिज्जासि संवुत्ता" । रामस्य धर्मपत्नी पतिगौरवसमुत्सेकिनी सीतापि गरिम्णैवमवगाहते—

अहमौपयिकी भार्या तस्यैव च धरापतेः ।
व्रतस्नातस्य विद्येव विप्रस्य विदितात्मनः ॥ ५।२१।१७

रावणभीता सीता उष्णेन संतप्ताऽचिरोद्धृता पद्मिनीव सन्तापं अनुभवति—

तप्यमानामिवोष्णेन मृणालीमचिरोद् धृताम् । ५।१९।१७

अस्याश्चोपमाया निर्यासमाहरन्नाह कौशली कालिदासः शाकुन्तल चतुर्थाङ्के प्रथमाङ्के—

को णाम उण्होदएण णोमालिअं सिञ्चेदि ?
न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः । १।१०

अत्र 'तूलराशाविवाग्निः' रामायणस्य प्रत्यक्षप्रभावं प्रकटयति—

अद्य वो मामका बाणा महाकार्मुकनिः सृताः ।
विधमिष्यन्ति गात्राणि तूलराशिमिवानलः ॥ ६।८८।७

'तमस्तपति धर्मांशौ' (५।१४) इत्युपमा कालिदासस्य रामायणात् समाहृता । कौशल्यामाह लक्ष्मणः—

हरामि वीर्याद् दुःखं ते तमः सूर्य इवोदितः । २।२१।१८

सप्तमाङ्के दुष्यन्तशकुन्तलयोः शुभसंगमावसरे संगमोऽयं शशिरोहिण्योः समागम इवाभाति राजमनसि—'उपरागान्ते शशिनः समुपगता रोहिणीयोगम्'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नायकनायिकयोर्मेलनावसरे शशिरोहिण्योरुपमाग्रहणमविरलतां याति रामायणे, सीतामाह हनुमान्—

पृष्ठमारोह मे देवि मा विकाङ्क्षस्व शोभने।
योगमच्विच्छ रामेण शशाङ्केनेव रोहिणी॥

स्वर्गादपि रमणीयतरं मारीच तपोवनम्। तत्र सन्ति सर्वं कामदाः कल्पवृक्षाः रत्नमण्डितं शिला तलम् काञ्चनपद्मप्रसूतिः प्रवाहिणी, विबुधवनितानां लीलालास्यम्—

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमो
यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी॥ ७।१२

ऐश्वर्यस्यायमक्षयः स्वर्गो रामायणादिहावतरति। रामायणे उत्तरकुरूणां वर्णना दुरासदं कमपि सर्वजनेप्सितं लोकं नयनातिथ्यं प्रापयति—

ततः काञ्चनपद्माभिः पद्मिनीभिः कृतोदकाः।
नीलवैदूर्यपत्राढ्या नद्यस्तत्र सहस्रशः॥ ४।४३।३९
सर्वरत्नमयैश्चित्रैरवगाढा नगोत्तमैः।
जातरूपमयैश्चापि हुताशनसमप्रभैः॥ ४।४३।४३
नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः।
दिव्यगन्धरसस्पर्शाः सर्वकामान् स्रवन्ति च॥ ४।४३।४४

अत्रापि स्त्रियो लावण्ययौवनोपेता मनोहारितां न त्यजन्ति—

स्त्रियश्च गुणसम्पन्ना रूपयौवनलक्षिताः॥४।४३।४८

उत्तरकुरूणामनन्तमैश्वर्यं कालिदासमानसं प्रसभमाचकर्ष। ऐश्वर्यस्य समग्रस्य पूर्णायितं रूपं वर्णयन्नसौ सदैव रामायणस्य सर्वाश्चर्यमये रत्नद्वारपथे स्वीयां स्वैरिणीं कल्पनां प्रेरयामास। प्रेम प्रणयिनोरविश्वासेन नवं जन्म समासाद्य रमणीयतामधिगच्छति। रामायणशाकुन्तलयोरुपाख्यानं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समालोच्यते चेत्, द्रष्टव्यः खलुप्रियेष्वविश्वासः । स्त्रियं प्रति अमूलकसन्देहो यथा रामस्य तथैव दुष्यन्तस्यापि प्रणयविगमशिथिलं चक्रे । सफलसंगममासाद्य नानयोः प्रेम अचिरादवसन्नं प्रतीयते। एकेन यावज्जीवनं हिरण्मयप्रतिकृतौ विमानिताया भार्याया अन्वेषणं कृतम्, अपरेणालेख्यमङ्कयित्वा प्रत्याख्याताया: प्रियायाः सान्निध्यमन्विष्यते । आख्यानगतां परिस्थितिं विचार्य निरङ्कुशा वयं वक्तुं शक्नुमो द्वावप्यत्र विरहिणौ जलपूर्णां स्रोतस्विनीमुपेक्ष्य मरीचिकाया मरुग्रासमालिङ्गतः, साधूक्तं दुष्यन्तेन—

स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणयवान् मृगतृष्णिकायाम् ।। ६।७६

किं बहुना, स्वदारपरित्यागाद् द्वयोरपि चरित्रयोरन्तर्दाहः विप्रलम्भशृङ्गारेणोज्ज्वलतामाकर्षति ।

पुंसां दक्षिणाङ्गनर्तने नरीणां वामाङ्गस्पन्दने च शुभफलमुपजायते । पुंसां वामाङ्गस्पन्दने नारीणां वामेतराङ्गनर्तने चैषामनिष्टमचिरभावीति बुद्ध्या नायकनायिकानामङ्गसञ्चालनादेव शुभाशुभयोः पूर्वाभासमसकृत् सूचयति वाल्मीकिः । रामायणे रामसुग्रीवयोः सख्यं सीतायाः शुभं, किन्तु वालिनिशाचराणामशुभङ्करमासीत् । अतश्चानयोः प्रणयप्रसङ्गे सर्वेषामेषां तथा सीतायाश्च वामाक्षिस्पन्दनात् सख्यस्यास्य भाविफलं सूचयन्नाह कविः—

सीताकपीन्द्रक्षणदाचराणां
राजीवहेमज्वलनोपमानि ।
सुग्रीवरामप्रणयप्रसङ्गे
वामानि नेत्राणि समं स्फुरन्ति ।। ४।५।३१

एवं बहवः सन्ति दृष्टान्ताः । शाकुन्तलेऽपि नैवास्त्यस्याः प्रयोगरीतेर्व्यभिचारः । वरस्त्रीलाभात् प्राक् दुष्यन्तस्य वामेतरभुजस्पन्दो जायते, प्राक् प्रत्याख्यानात् शकुन्तलायाश्च दक्षिणाक्षिस्फुरणमनुल्लिखितं नास्ति—अम्महे किं मे वामेदरं णअणं विप्फुरदि ।'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभिज्ञानशाकुन्तले सकलप्रयोजनमौलीभूतं यदभिज्ञानमङ्गुलीयकमस्ति महाभारते तस्योल्लेखो नास्ति। पद्मपुराणस्य कालः कालिदासोत्तरवर्त्तिनि एवेति विद्वद्वरिष्ठानां निश्चयात् पद्मपुराणादभिज्ञानप्रदानरीतिः कालिदासीये नाटके समाहृता न वेति प्रश्ने मुह्यन्ति सहृदयाः। कालिदासीयभावनायां रामायणस्य यादृशः सर्वातिशायी सञ्चारः सततमनुभूयते, तथात्वे रामायणादेवेदमभिज्ञानरूपेणाङ्गुलीयक-प्रदानं कालिदासमनस्यवातरदिति सिद्धान्ते नास्माकं कल्पना स्खलद्गतिर्भूयात्। अशोकवने सीतायै रामनामाङ्कितमङ्गुलीयकमददात् हनुमान् यदाह—

इदं तु पुरुषव्याघ्रः श्रीमान् दाशरथिः स्वयम्।
अङ्गुलीयमभिज्ञानमदात् तुभ्यं यशस्विनि॥ ५।५८।६६

दुष्यन्तेनापि स्वनामाङ्कितमङ्गुलीयकं शकुन्तलाया हस्ते स्वयं पिनद्धम्—

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तम्।
तावत् प्रिये मदवरोधगृहप्रवेशं
नेता जनस्तव समीपमुपेष्यतीति॥ ६।१२

एतदङ्गुलीयमेवाभिज्ञानं जातम्। अभिज्ञायते अनेनेति अभिज्ञानम्। अस्यैवाभावात् दुर्वाससः शापात् राजसभायां सर्वसविधं दुष्यन्तेन शकुन्तला प्रत्याख्याता। रामायणे हनुमन्तं मायारूपधरं रावणं मत्वा सीतासीत् संशयापन्ना। अभिज्ञानरूपेण अखिलराघववृत्तान्तं वर्णयन् हनुमान् विश्वासमस्या विदधे—

एवं विश्वासिता सीता हेतुभिः शोककर्शिता।
उपपन्नैरभिज्ञानैर्दूतं तमधिगच्छति॥ ५।३५।८५

हनुमता सह गन्तुमनिच्छन्तीं सीतामाह हनुमान्—

यदि नोत्सहसे यातुं मया सार्धमनिन्दिते।
अभिज्ञानं प्रयच्छ त्वं जानीयाद् राघवो हि यत्॥ ५।३८।१०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभिज्ञानरूपेण सीता कस्यचित् धृष्टस्य काकस्योपाख्यानमाह यस्तस्याः स्तनान्तरं व्यदारयत्, यस्य जिघांसया क्रुद्धो राघवो ब्रह्मास्त्रेण दर्भं योजयामास। जिजीविषुरयं काकः प्राणभयाद् भीतस्त्रिभुवनं परिक्रम्यापि कुत्रापि आत्मपरित्राणमलब्ध्वा राघवमेव शरणं गतः रामोऽपि शरणागतवत्सलः काकस्य प्राणान् रक्षयित्वा अमोघेनास्त्रेण दक्षिणाक्षि चिच्छेद। अङ्गुलीयकं दर्शयितुमसमर्था शकुन्तला मातृहीनस्य दीर्घापाङ्गस्योपाख्यानं राजानमाह, योऽयं मृगपोतो वेतसलतामण्डपे राजानमुपेक्ष्य शकुन्तलाया हस्ताज्जलं पपौ।

अन्यदपि अभिज्ञानं रामायणे दृश्यते, यथा सीतायाश्चूडामणिरेव-तं मणिं प्रदाय सीता हनुमन्तं स्मारयति—

मणिं दत्वा ततः सीता हनुमन्तयाथब्रवीत्।
अभिज्ञानमभिज्ञातमेतद् रामस्य तत्वतः॥ ५।३९।१
मणिं दृष्ट्वा तु रामो वै त्रयाणां संस्मरिष्यति।
वीरो जनन्या मम च राज्ञो दशरथस्य च॥ ५।३९।२

रामायणे अभिज्ञानशब्दस्यैतादृशं प्राचुर्यं कालिदासेनोपेक्षितमिति वक्तुं नालम्। अतः खलु अभिज्ञानशाकुन्तले अभिज्ञानशब्दो यथादिकवेर्वाल्मीकेः सस्नेहमभिज्ञानं भूत्वा कालिदासीये वस्तुनि तदनुभावस्यालक्ष्य सञ्चारं सूचयति, तथैवादिकविं प्रति महाकवेर्नम्रश्रद्धाया अभिज्ञानरूपेणापि शब्दस्यास्य व्यञ्जना सुप्रयुक्ततरैव कालं जित्वा स्वं मधुरिमाणं तनोति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विवर्त विपरिणाम समीक्षा

बलबहादुर शास्त्री

अखिलमिदं जगदात्मकं कार्यजातं त्रेधा व्याचक्षते दार्शनिकाः। त्रीणि एतेषाम् एतद्विषये दर्शनानि-आरम्भः विपरिणामः विवर्तश्चेति। तत्रारम्भो नाम उत्पत्तिः सा च कारणव्यापारात् प्राक् असतः कार्यस्य तदुत्तरं सत्तालाभ एव, यथा मृदवस्थायाम् दण्ढचक्रादिव्यापारात् पूर्वमभवन् तदुत्तरञ्च भवन् घट : उत्पद्यते इति व्यपदिश्यते। इदञ्च कणादगौतमीयादीनाम् असत्कार्यवादिनां दर्शनम्। एते हि पृथिव्याद्युपादानभूतेभ्यः परमाणुभ्यो द्व्यणुकादि क्रमेणाखिलस्य जगतः उत्पत्तिं वर्णयन्ति। एतन्मते परमाणव एव विश्वात्मकस्य कार्यजातस्यारम्भकाः। जीवादृष्टेश्वरादिकञ्च तत्र सहकारि, कार्यञ्च कारणव्यापारात् प्राकसदेव तत्तत्कारणैः जन्यते, कारणगुणात्मकञ्च भवति। कारणं कार्यमिव कारणगुणाः कार्यगुणानारभन्ते, अतिरिच्यते च कारणात् कार्यम् यथा तन्तुभ्यो पटः। अन्ये तन्तवः अन्यश्च तैरारभ्यमाणः पटः, इति हि एतेषां दर्शनम्।

विपरिणामस्तु कारणस्यावस्थान्तरापत्तिः—तात्विकोऽन्यथाभाव इति यावत्। दर्शनमिदं कापिलानां विशिष्टाद्वैतिनांच। एते हि न क्वापि कारणव्यापारशतेनापि असतः सत्तामुत्पत्तिं वा इच्छन्ति।

'नासतो विद्यते भावः नाभावो विद्यतेसतः' इति हि एतेषामुद्घोषः। एतन्मते कारणव्यापारात् प्रागपि सदेव कार्यं कारणव्यापारेणाभिव्यज्यते-आविर्भवति इति यावत्। यथा—शिलाखण्डे सन्नेव मूर्त्याकारः कारुव्यापारेणाभिव्यज्यते न तु असन्नुत्पद्यते, एवम् मृदाद्यवस्थायां मृदादिरूपेण सदेव घटादिकार्यं दण्डचक्रादि व्यापारैरभिव्यक्तिं नीयते, इयमभिव्यक्ति-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रेव चाविर्भाव इत्युच्यते। इत्थञ्च अवस्थैव भिद्यते न तु वस्तु। मृदेव-घटाद्यवस्थामापद्यते कारणव्यापारादुत्तरम् ततः पूर्वं तु घटो भवति मृदवस्थः। एतदेव एतेषां दर्शनम् जगदात्मकस्याखिलस्यापि कार्यजातस्य विषये। प्रकृतिप्रधानाख्यं त्रिगुणात्मकं मूलभूतं तत्त्वम् निखिलस्यास्य जगतः उपादानम्। तदेव च लब्धगुणवैषम्यादिरूपसामग्रीकं क्रमेण जगदात्मना परिणमते। अनन्यच्च दर्शनेऽस्मिन् कारणात् कार्यम्। यथा तन्तव एव अवस्थान्तरमापन्नाः पट इत्युच्यन्ते न तु तन्तुभ्यो व्यतिरिक्तः पटो नाम। इयमवस्थान्तरापत्तिरेव कारणस्य कार्यात्मना परिणामः, अयमेव च कार्यस्य आविर्भावः, आविर्भाव एव च 'पट उत्पद्यते' इत्येवमुत्पत्त्यादिशब्दैः व्यपदिश्यते न तु प्रागसत्त्वे सति सत्वरूपोत्पत्तिरेतन्मतेऽस्ति।

विवर्तस्तु पुनः वस्तुनोवस्थान्तराभासः अतात्विकोऽन्यथाभाव इतियावत्। यथा रज्जोः सर्पतयाभासः, दर्शनमेतदद्वैतिनाम्। अत्र दर्शने नारम्भवाद इव प्रागसत् कार्यं कारणाज्जायते नापि परिणामवाद इव कारणं कार्यरूपेण परिणमति-तात्विकीं कार्यावस्थामापद्यते-अपितु अविकृतरूपमेव कारणम् वासनादिवशेन केवलं कार्यात्मना आभासते, यथा रज्ज्वादिकं वस्तुतोऽविकृतरूपमेव सर्पाद्यात्मना भासते, कार्यंच असदेव कारणव्यापारात् प्रागपि पश्चादपिच। आरम्भवादे पुनः प्रागसदपि पश्चाद् भवति सत्, परिणामवादे तु सर्वदैव सदिति एतद्वादद्वयापेक्षया विवर्तवादे अयं महान् विशेषः। निखिलमपि जगदात्मकं कार्यं मूलकारणापेक्षया विवर्तः। जगतो मूलकारणञ्च अद्वयं ब्रह्मतत्त्वं तदेव च मायाशबलितं वेदान्तवर्णितदिशा विश्वात्मकविविधकार्यरूपेणाभासते, कार्याणि च प्रतिभासमात्रशरीराणि, रज्जुसर्पादिवत् सर्वथैव असत्यानि। अस्मिन्नपि दर्शने कार्यकारणयोः अनन्यत्वम् किन्तु नेदमनन्यत्वं तादात्म्यरूपम् यत : ब्रह्मरूपं कारणम् सत्, जगदात्मक कार्यञ्चासत्, सदसतोश्च तादात्म्यं न संभवति, अपितु ब्रह्मणोऽन्यत् नास्ति किञ्चिदितिकृत्वा अन्यस्य जगत अभाव एव कार्यस्य कारणादनन्यत्वम्। विशिष्टाद्वैतवादे तु तादात्म्यरूपं कारणकार्ययोः अनन्यत्वम्। तन्मते हि सूक्ष्मचिदचिच्छरीरकम् ब्रह्म विश्वा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्मककार्यरूपेण परिणमते। स्थूलचिदचिच्छरीरकं ब्रह्मैव कार्यं कारणमिव च कार्यमपि सदिति उपपद्यते तादाम्यरूपमनन्यत्वम्। एवञ्च अद्वैत-विशिष्टाद्वैतयोः ब्रह्मकारणतावादिनोरपि विवर्तपरिणामकृतो महान् विशेषः। अद्वैतिनो हि ब्रह्मणः विवर्तोपादानत्वमिच्छन्ति, विशिष्टाद्वैति-नस्तु परिणामोपादानत्वम्।

अनयोश्च विवर्तपरिणामयोः जगतः अतात्त्विकत्त्वतात्त्विकत्वाभ्युपगम एवाधारः। तदुक्तम्—

सतत्त्वतोन्यथाप्रथा विकार इत्युदीरितः।
अतत्त्वतोन्यथाप्रथा विवर्त इत्युदाहृतः।

कार्यकारणयोः सत्तापेक्षयापि विवर्तविपरिणामौ परिभाषन्ते विद्वांसः। तथाहि "उपादानसत्तासमसत्ताककार्योत्पत्तिः विपरिणामः, उपादानसत्ताविषमसत्ताककार्योत्पत्तिः विवर्तः। यत्र उपादानस्य-कारणस्य यादृशी सत्ता तादृशीएवसत्ता कार्यस्यापि तत्र परिणामव्यपदेशः। यथा—दधि दुग्धस्य परिणामः। सर्वमते एव हि दधि दुग्धयोरुभयोरपि एक विधा सत्ता, सा अद्वैतमते व्यावहारिकी, मतान्तरे तु पारमार्थिकीत्यन्यत्। यत्र तु अन्यविधा कारणस्य सत्ता अन्यविधा च कार्यस्य तत्र विवर्तव्यवहारः, यथा—रज्जुसर्पयोः। सर्वमते एव अन्यविधा सर्पस्य सत्ता अन्य विधा च रज्जोः। तत्र रज्जोः अद्वैतमते व्यावहारिकी सत्ता नयान्तरे तु पार-मार्थिकी। सर्पस्य तु प्रायेण सर्व नये एव प्रातिभासिकी सत्ता।

इदमत्र ध्येयम्-पदार्थानाम् त्रिविधा सत्ता-पारमार्थिकी व्यावहारिकी प्रातिभासिकी च। तत्राखिलस्य जगतः विवर्तोपादानभूतस्य अद्वयस्य ब्रह्मणः पारमार्थिकी सत्ता। तदतिरिक्तस्य अखिलस्यापि विवर्तात्मकस्य प्रपञ्चस्य व्यावहारिकी सत्ता। वस्तुतः असत्यस्यापि तस्य यावद् व्यवहारं अनुवृत्तिः, ब्रह्मज्ञानेनैव च तन्निवृत्तेः।

शुक्तिरजतादेस्तु प्रातिभासिकी सत्ता। व्यवहारकाले एव रजतादि-ज्ञानेन तन्निवृत्तेः। इदञ्च अद्वैतवादानुसारेण द्रष्टव्यम्। विशिष्टा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वैतादिदर्शने तु द्वे एव सत्ते, पारमार्थिकी प्रातिभासिकी च। एतद्दर्शने हि ब्रह्म इव जगदपि पारमार्थिकं सत्। तदेवम् कारणकार्यभूतयोः ब्रह्मजगतो-रुभयोरपि पारमार्थिकसत्त्वेन कार्यस्य कारणसत्तासमसत्ताकत्वात् जगतो भवति ब्रह्मपरिणामता। अद्वैतदर्शने तु तयोः अस्ति पारमार्थिकत्वव्याव-हारिकत्वकृत: सत्तागतो विशेष इति जगद् ब्रह्मणो विवर्तः।

इदमत्र ध्येयम्—अयं विवर्तपरिणामविषयकः मतभेदः मूलकारणम-पेक्ष्यैव न तु जागत्कानि कार्यकारणान्यपेक्ष्य। विवर्तवादिनापि हि यत्र कार्यकारणे उभे अपि व्यावहारिके तत्र परिणाम एवाभ्युपगन्तव्यः। यथा—दधि दुग्धस्य परिणाम एव, यद्यपि उभे अपि ब्रह्मणो विवर्तभूते। एवञ्च विवर्तवादे यद्यपि अखिलम् कार्यजातं मूलकारणभूतब्रह्मापेक्षया विवर्तः तथापि विवर्तस्य यत्कार्यं तत्तदपेक्षया परिणाम एव। उभयोरपि व्यावहारिकत्वेन समसत्ताकत्वात्। एवं परिणामवादेपि विवर्तस्य सर्वथैव न अस्तित्वमिति न, रज्जुसर्पादिस्थले परिणामवादिनापि सर्पस्य विवर्तरूप-तैवाभ्युपगन्तव्या। तदित्थं जागत्केषु मूलकारणातिरिक्तेषु वा पदार्थेषु यत्र परिणामपरिणामिभावः परिणामवादिनः सम्मतः तत्र विवर्तवादेपि परिणामपरिणामिभाव एव। यत्र तु विवर्तरूपता विवर्तवादिनः मता, यथा रज्जुसर्पादौ तत्र परिणामवादेपि विवर्तरूपतैव।

सम्प्रति वैयाकरणानां विवर्तपरिणामविषये का दृष्टिरिति विमृशामः। अद्वैतिन इव शाब्दिका अपि जगतः मूलकारणद्यपेक्षया विवर्त-रूपतामेवाभ्युपगच्छन्ति तथा च स्फुटमेव प्रत्यपादयत् वैयाकरणानां प्रामाणिकः आचार्यो भर्तृहरिः वाक्यपदीयारम्भे एव—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥

अत्र विवर्ततेऽर्थभावेन इत्यनेन शब्दात्मकस्य अनादिनिधनस्य परमार्थसतः अद्वयस्य, ब्रह्मतत्वस्याखिलमपि जागत्कम् कार्यजातं विवर्त इत्युक्तम्। अग्रेपि—

एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेपि शक्तिभ्यः पृथक्त्वेनेव वर्तते॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यादिकारिकाभिः शब्दब्रह्मात्मकस्य अद्वैततत्त्वस्य पुष्टीकरणेन—ब्रह्मणोऽद्वैत व्यवस्थापनेनेति यावत्—विवर्तवादे दृढं पक्षपातः सूचितो वाक्यपदोयकृता । विवर्तवादाभ्युपगमं विना हि अद्वैतवादो न शक्यते प्रतिष्ठापयितुम् । वैयाकरणमूर्द्धन्येन कौण्डभट्टेनापि वैयाकरणभूषणसारे—

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद् विवर्तते ॥

इत्यनेन विवर्तवादे एवादरो दर्शितः ।

अथाद्वैतवादस्य तदुपपादकस्य विवर्तवादस्य च प्रतिपादनपरेऽपि वाक्यपदीये विवर्तपरिणामावादाय या विसंगतिरापाततः परिलक्ष्यते, तत्र मनाग्दृष्टिपातं कुर्मः । तथाहि—

शब्दस्य परिणामोयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥

इत्यस्याः कारिकायाः पूर्वाद्र्धेन वाक्यपदीयकारः जगतः परिणामरूपताम्, उत्तराद्र्धेन तु विवर्तरूपताम् प्रतिपादयति । 'अनादिनिधनम् इत्याद्युक्त-कारिकानिचयेनापि च विवर्तवादमेव समर्थयते सः । तदिदं भवति विरुद्धार्थम् । अत्र केचित् परिणामविवर्तशब्दयोरनन्यार्थतामभ्युपगम्य 'शब्दस्य परिणामोऽयम्' इत्येतां कारिकां संगमयन्ति । तथाहि तात्त्विकत्वातात्त्विकत्वविशेषानादरेण केवलम् अवस्थान्तरता रूपसाम्यमादाय क्वचित् परिणामोपि विवर्त इति, विवर्तोपि च परिणाम इति व्यपदिश्यते । इदमेव च दर्शनंशब्दस्य परिणामोऽयमिति वदता हरेः । अन्यत्रापि परिणामविवर्तयोः पर्यायता दृश्यते । तद्यथा—

एको रसः करुण एव निमित्तभेदाद्,
भिन्नः पृथक्पृथगिवाश्रयते विवर्तान् ।
आवर्तबुद्बुदतरङ्गमयान् विकारान्
अम्भः यथा सलिलमेव हि तत्समस्तम् ॥

इतिपद्ये भवभूतिः विपरिणामार्थकं विकार-शब्दं विवर्तशब्दञ्च एकार्थतया प्रायुंक्त । अत्र हि श्लोके आवर्तबुद्बुदादिरूपैः सलिलविकारैः रसान्तर-रूपान् करुणरसविवर्तान् निदर्शयति कविः । विकारैः विवर्त्तानां निदर्शनञ्च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विवर्तविकारशब्दयोः एकार्थतायामेवोपपद्यते । अन्यथा उक्तश्लोकोक्ता विकारविवर्तयोः दृष्टान्तदार्ष्टान्तिकता भज्यते ।

अस्माकन्तु एतद्विषये इयं दृष्टिः यत् शब्दस्यपरिणामोयम् इति पूर्वार्द्धे 'शब्द इतिपदम् न मूलकारणभूतपराख्यशब्दब्रह्मपरम् अपितु तद्विवर्तभूत-पश्यन्त्याख्यशब्दतत्त्वपरम् वैखर्यात्मकस्थूलशब्दपरं वा । स्थूल-शब्दतत्त्व-वर्णनमेव च अत्रास्ति प्रकृतम् । पराख्यस्य शब्दब्रह्मणः आद्योविवर्तः पश्यन्ती, सा च वेदात्मिका वाक् । अत एव च "प्राप्त्युपायोनुकारश्च तस्य वेदो महर्षिभिः"…इत्यनेन वेदस्य शब्द-ब्रह्मानुकृतिरूपता वाक्यपदीये प्रतिपादिता । छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत इत्युत्तरार्द्धे व्यवर्तत इत्यस्य अजायत इत्यर्थः ।

जनिश्चात्र विपरिणामरूपा एव । छन्दोभ्य इति पंचमी तु 'जनिकर्तुः प्रकृतिरित्यनुशासनात्' । अयमुत्तरार्द्धश्च 'शब्दस्य परिणामोयमिति पूर्वार्द्धस्यैव विश्लेषणभूतः । ततश्चायमस्याः कारिकाया अर्थः पश्यन्त्याख्य-स्य मूलशब्दतत्त्वविवर्तभूतस्य शब्दतत्त्वस्यायं सर्वोपि प्रपञ्चः परिणामः । तथाहि उक्तपश्यन्तीरूपवागात्मकेभ्यः छन्दोभ्यः वेदेभ्यः विश्वमेतदजायत यद्वा शब्दस्य परिणामोयमिति पूर्वार्द्धेन आद्यविवर्तभूतस्य वेदात्मकस्य शब्दतत्त्वस्य परिणामः जगदिति प्रतिपाद्य उतरार्द्धेन वेदस्य शब्दब्रह्मणः आद्यविवर्तरूपतां प्रतिपादयति वाक्यपदीयकारः । अस्मिन् पक्षे छन्दोभ्यः इति पंचमी प्रभृत्यादियोगेबोध्या । प्रथमं छन्दांसि आरभ्य एतद्विश्वं ब्रह्मणः व्यवर्त इति च तदर्थः । छन्दांसि एव प्रथमः शब्दब्रह्मणः विवर्त इति यावत् । एवञ्च पश्यन्त्यात्मकशब्दापेक्षया जगतः परिणामरूपता पराख्य-शब्दब्रह्मापेक्षया तु विवर्तरूपता हरेः प्रतिपिपादयिषिता । मूलकारणापेक्षया विवर्तवादेपि विवर्तस्य यत्कार्यं तद् तद्विवर्तापेक्षया परिणाम एव भवति इति प्रागेवास्माभिः व्यवस्थापितम् । एतदर्थमेव च विवर्त विपरिणामौ प्राक्विस्तरेण व्याख्यातौ । विवर्तपरिणामवादिनोः मतभेदः, मतैक्यमित्या-दिकं च सर्वं विशदय्य दर्शितम् । तदेवं "अनादिनिधनमिति कारिकानुसारेण शब्दब्रह्मणो विवर्तस्यापि जगतः आद्यविवर्तभूतं पश्यन्त्याख्यं वेदात्मकं शब्दमपेक्ष्य परिणामरूपताप्रतिपादनं न विरुद्ध्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काव्यकलानिधौ चित्रालंकारस्वरूपम्

डा. गायत्री देवी

कृष्णसुधीविरचितः काव्यकलानिधिसंज्ञकोऽयं ग्रन्थः अलंकारशास्त्रे प्रमुखं स्थानमधिवसति। अलंकारशास्त्रसम्बन्धिविषयाः प्रायः सर्वेऽपि अत्र सुस्पष्टं सोदाहरणं च उपन्यस्ताः। ग्रन्थकर्त्रा कृष्णसुधिया केरलस्थकोलत्तुनाडु (Quilon) शासकस्य राजा रविवर्मणः (१८४८-१९०६ A. D.) आस्थाने उषित्वा स्वाश्रयदातृपश्लोकनपरतया निर्मितोऽयम् अलंकारग्रन्थः चरित्रात्मकप्राधान्यं वैशिष्ट्यं च अभिव्यनक्ति।

अलंकारशास्त्रे चित्रालंकारनिरूपणं स्वस्वप्रतिभाबुद्ध्यनुरोधेन तत्तदालंकारिकैरनेकधा प्रतिपादितम्।

कृष्णसुधिया काव्यकलानिधौ निबद्धं चित्रालंकारस्वरूपनिरूपणम् अत्र प्रस्तूयते। ग्रन्थेऽस्मिन् शब्दालंकारनिरूपणप्रस्तावे चित्रालंकारः एवं निरूक्तः—

'तच्चित्रं यत्र वर्णानां छत्रा (चक्रा ?) द्याकृति हेतुता। सन्निवेशविशेषेण यत्र न्यस्ताः वर्णाः चक्र-खड्ग-मुरज-छत्र-पद्माद्याकारमुल्लासयन्ति"—

इति। किं च अत्र 'आदिशब्देन नाग-गोमूत्रिका-अर्धभ्रमक-रथ-सर्वतोभद्रबन्धाः-गृह्यन्ते' इत्युच्यते। अत्र चक्र-खड्ग-मुरज-छत्र-पद्म-सर्वतोभद्रबन्धाः चित्रमार्गोपदेशकलक्षणैः सलक्ष्यं च प्राचामनुरोधेन निरूपिताः। एवमुपपादिताः चक्रबन्धादयः चित्रालंकारभेदाः चित्रलेखनपुरस्सरमत्र प्रदर्श्यन्ते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथमतः चक्रबन्धस्य चित्रलेखनक्रमः एवं निर्दिश्यते—

वक्ष्यते (बध्यते ?) षडरं चक्रं प्रत्यरं तन्नवाक्षरम् ।
त्रयाणामपि पादानां दशमं कर्णिकाक्षरम् ॥

आदितः स्वस्व धु (तु ?) र्यारैः त्रयः पादाश्चतुर्थगाः ।
वर्णाः षष्ठान्त (न्त्य ?) मारभ्य संवदन्तेऽन्तिमाक्षरैः ॥

आद्ये (मध्ये ?) द्वौ द्वौ विसंवादौ षट्स्वरेषु क्रमाद् भवेत् ।
चतुर्थैः सप्तमैर्वर्णैः वर्णनं कविकाव्ययोः[1] ॥

इति बन्धोद्धारक्रमः—' इति ।

चक्रबन्धस्य उदाहरणश्लोकः एवमुपस्थाप्यते—

कृष्णश्रीकृपया चिरं कृतिनुतो राजास्य धीरस्सदा
वन्यानुष्णभगोत्रपक्षितिपते नित्यं हि कृष्णं धिया ।
मन्वानो सुहृदेकभिन्मतिगताधिः क्ष्मापतिः श्रीङ्जया
यामप्राकृतपावनोत्तमकलोदारी दयावान् मया ॥

इति ।

चक्रबन्धेऽस्मिन् सुनिपुणं यथा तथा कृष्णसुधीः चतुर्थवलये 'कृष्ण-सुधीकृतिः' इति, सप्तमवलये 'चित्रकरानिधिः' इति च स्वसंकेतं संयोजितवान् । अत्र ग्रन्थकर्तुः नैपुण्यं प्रशंसनीयमास्ते । 'चित्रकलानिधिः' इति ग्रन्थकर्तुः अन्या कृतिः वर्तते । वस्तुतस्तु तत्रैव चित्रकवित्वमधिकृत्य सविस्तरं प्रदर्शितं स्यात् । अत्र तु दिङ्मात्रं निरूपितम् । अत्र प्रस्तुते चक्रबन्धे सप्तमवलये 'चित्रकरानिधिः' इति दृश्यते । रलयोरभेदः न दोषाय । तदुक्तम् एकावल्याम् रलयोर्लडयोस्तद्वल्लकयोर्वबयोरपि ।'

१. एते चक्रबन्धलेखनक्रमबोधकाः श्लोकाः चर्लवेंकटसूरिकृते नौकासंज्ञके, मल्लादिलक्ष्मणसूरिविरचिते मन्दरसंज्ञके च साहित्यरत्नाकर व्याख्याने समुपलभ्यन्ते । साहित्यरत्नाकरः—धर्मसूरिः—पृ० ४१२ संस्कृत अकादमी उस्मानिया विश्वविद्यालयः, हैदराबाद १९७४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्य चित्रं तावत्—



अथ खड्गबन्धस्य चित्रलेखनक्रमः एवमुपदर्श्यंते—

आदौ शंकू तदूर्ध्वे तु तिर्यक् स्यान्नवकोष्ठकम् ।
आधारफलकं तस्योपरिमुष्टिस्त्रिकोष्ठिका ॥
तदूर्ध्वं फलकं पंचदशकोष्ठं पुनस्तथा ।
तिर्यग्लिखेत् तदुपरि धाराद्वयशिखायुतम् ॥
खड्गं श्लोकद्वययुतं प्राञ्चः प्राहुर्मनीषिणः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति। अस्य बन्धस्य लक्ष्यं तावत् एवं प्रदर्श्यते—

कोलाखेलकलापालखड्गभीदासतामरा।
दासतामरभूजश्री श्रीजभूरमता सदा॥

अस्य चित्रं एवं भवति—



ततः मुरजबन्धस्य चित्रलेखनक्रमः एवं निर्दिश्यते—

चतुष्पंक्तिगतान् श्लोकपादान् कृत्वाद्यपादतः।
तत्रावरोहयेद् वर्णानेक-द्वि-त्रि-चतुः क्रमात्॥

अन्त्याच्च पंचषट्सप्ताष्टक्रमादभिरोहयेत्।
ततस्त्वारोहयेदन्त्यादेकद्वित्रिचतुः क्रमात्॥

अन्त्याच्च पंचषट्सप्ताष्टक्रमादवरोहयेत्।
आद्यन्तपदसंवादः स्यादेवं पठने कृते॥

आद्यमाद्यं द्वितीयं च तृतीयं च द्वितीयके।
आद्ये चतुःपंचमं च द्वितीये षष्ठ सप्तमौ॥

आद्येऽष्टमाद्यन्तं द्वितीये प्रथमे पुनः।
द्वितीयं च चतुर्थं च द्वितीये तु चतुर्थकम्॥

पंचमं चाद्यकोष्ठेषु सप्तमावष्टमं पुनः।
द्वितीये तत्तु पूर्वार्धसंवादि स्यान्न संशयः॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयतुर्ययोरेवं पादयोर्विधिमुन्नयेत् ।
तत्तु तुर्यार्थसंवादि स्यादेवात्र न संशयः ॥

उक्तो मुरजबन्धोऽयं कविभिश्चित्रवेदिभिः ॥

इति । अस्य उदाहरणं तावत् —

श्रीमन्तं कामदं सत्वधीमन्तं लक्षदं सताम् ।
भामन्तं भूमिदं सत्यकामन्तं कामदं सर ॥

इति । अस्य चित्रं एवं प्रदर्श्यते—



अथ छत्रबन्धस्य चित्रलेखनक्रमः एवं प्रतिपाद्यते—

एक त्रि पंच सप्ताधोऽधोगृहान् विलिखेद् बुधः ।
तेषां मध्यगृहास्ताच्चतुष्ठकोष्ठानि संलिखेत् ॥

आनुष्टुभं पादमाद्यं मध्यकोष्ठगतं पठेत् ।
अनुलोमेन तत्रैव पादे पादं द्वितीयकम् ॥

उत्तरार्धं प्रथमतस्त्वाषोडश गृहान् लिखेत् ।
द्वादशाक्षरलाभोऽयं छत्रबन्धः प्रकीर्तितः ॥

अस्योदाहरणमेवं प्रदर्श्यते —

भाते (ति ?) न (स ?) घा कोलमान्यभूदारेण नरेन्दुना ।
भासमानघनच्छात्रा त्राच्छानघनमा सभा ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection



अत्र 'भासमानघनच्छात्रा त्राच्छान घनमा सभा' इत्येतत् श्लोकस्य पूर्वार्धेन भाव्यम्, 'भाते सघा···इत्यादि तु उत्तरार्धेन। अन्यथा चित्र-मार्गोपदेशकलक्षणेन सह वैरुध्यमापत्य चित्रोपपादने असंगतिर्भवति। अतः तथा एवं ग्राह्यम्। भाते इत्यत्र भा धातोः आत्मनेपदं दुष्टम्। अतः भाति इति परस्मैपदिना भवितव्यम्। किं च 'नघा' इत्यत्र न इत्यस्य स्थाने स इति भाव्यम्। अन्यथा तु बन्धस्य चित्रोपकल्पने उपपत्तिः न भवति। अतः सघा इति परिष्कृतम्। ग्रन्थकारेण एवमत्र छत्रबन्धचित्रलेखनक्रम निरूपणे तल्लक्ष्यप्रदर्शने च स्वीया प्रतिभा प्रदर्शिता।

अथ पद्मबन्ध सर्वतोभद्रबन्धयोः काव्यप्रकाशस्थितश्लोका एव उदाहरणतया उद्धृताः इति तेऽत्र न प्रदर्श्यन्ते।

इत्थं कृष्णसुधीः चित्रालंकारं सविस्तरमुपपादयन् चित्रालंकारोप-पादने काव्यप्रकाशकारं मम्मटमतिशेते। एवं ग्रंथकारोऽयं न केवलं शास्त्रज्ञः, अपि तु सफलः कविरित्यपि वेद्यते यत् काव्यकलानिधौ स्वीय लक्ष्याणां सम्यक् प्रदर्शितत्वात्। एवं ग्रन्थोऽयं लक्ष्यलक्षणसमर्पकतया अलंकारशास्त्रे अत्यन्तं प्रसिद्धयति, स्वस्य अलंकारशास्त्रं प्रति सफलं योगदानं प्रदर्शयति च इति शम्॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतस्य महिला रचनाकर्त्र्यः

डॉ० कैलाशनाथ द्विवेदी

सुसमृद्धे संस्कृत-साहित्ये सरसमहिलारचनाकाराणां परम्पराऽत्यन्तं पुरातनी सुदीर्घाऽविच्छिन्ना च दरीदृश्यते। ऋग्वैदिकानेकसूक्तानां द्रष्ट्रीषु ऋषिकासु उर्वशीलोपामुद्रादिति-इन्द्राणी वागृम्भणी प्रभृति षड्विंशति ब्रह्मवादिन्यः कवयित्रीरूपे गृहीतुं शक्यते। आसां नैकमंत्रेषु साहित्यिकाभिरुचिरभिव्यज्यते वैदिकसाहित्ये।

बौद्धकाले वृद्धाः स्त्रियः स्थविराः थेरीति कथिताः, यासां कवित्वपूर्णानि गीतानि थेरीगाथा (खुद्दक निकाय) नाम्नि ग्रन्थे संगृहीतानि सन्ति। आसु रचनाकारासु मुक्ता नन्दाश्यामा चन्दा-उत्पलवर्णा-वासिष्ठी-आम्रपाली सुमेधा महाप्रजामती गौतमी-प्रभृति सप्तत्रिंशत् स्थविराणां काव्यरचनाः सन्ति, यास्वासां जीवनगाथाभिः सह सरसभावानां मार्मिकी अभिव्यक्तिर्वर्तते।

संस्कृत-साहित्ये महिलारचनाकाराणां पुरातनपरम्परा प्रथम शती ईस्वी पूर्वतः परवर्तिकालपर्यन्तं प्रवर्तिता परिलक्ष्यते। हालकृत गाथासप्तशत्यामनुलक्ष्मी-असुलद्धि-माधवी-प्रहता, रेवा, रोहा-शशिप्रभा बद्धावहीत्यष्टप्राकृत कवयित्रीणां रचनाः समुपलब्धाः भवन्ति।

प्राचीनमध्यकालिकमहिलारचनाकारासु गंगादेवी विद्या (विज्जका) मारुलामोरिका समुद्राफल्गुहस्तिनी विकटनितम्बा शीलाभट्टारिका देवकुमारिका प्रभृतयः प्रसिद्धा एव सन्ति। टीकाकार वल्लभदेव कविनाटककारराजशेखरादिसाहित्यशास्त्रिभिः सुभद्रायाः काव्यसौष्ठवमेवं प्रशंसितमस्ति—

"पार्थस्य मनसि स्थानं लेभे खलु सुभद्रया।
कवीनां च वचो वृत्तौ चातुर्येण सुभद्रया॥" (सूक्तिमुक्तावली)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुभद्रया सत्कवयित्र्या स्नेहप्रवृत्तिविषये स्वकट्वनुभवः एवं प्रकटीकृतोऽस्मिन् पद्ये—

"दुग्धं च यत्तदनुयत् क्वचितं ततो नु,
माधुर्यमस्य हृतमुन्मथितं च वेगात् ।
जातं पुनर्घृतकृते नवनीतवृत्तिं,
स्नेहो निबन्धनमनर्थपरम्पराणाम् ।।" (सुभाषितावली)

फल्गुहस्तिन्याः पद्यद्वयम् प्राप्यते, प्रबन्धात्मकरचना अनुपलब्धाऽस्ति। बालचन्द्रोदय विषये तस्या मंगलकामनापूर्णाद्भुतकल्पना एवमभिव्यक्ता दृश्यते—

"त्रिनयन जटावली पुष्पं मनोभवकार्मुकं,
ग्रहकिसलय सन्ध्यानारी नितम्बनखक्षतम् ।
तिमिरभिदुरं व्योम्नः शृंगं निशावदनस्मितं,
प्रतिपदि नवस्येन्दोर्बिम्बं सुखोदयमस्तु वः ।।"

(शार्ङ्गधरपद्धतिः)

सुकविराजशेखरेण विकटनितम्बायाः[1] मधुरवाणी मुक्तकण्ठेन एवमनुमोदिता—

"के वैकट नितम्बेन गिरां गुम्फेन रञ्जिताः ।
निन्दन्ति निजकान्तानां न मौग्ध्यमधुरं वचः ।"

(सूक्तिमुक्तावली)

---

१. विकटनितम्बायाः समासोक्तिमयं शृंगाररसपूर्णं पद्यमेकमास्वादनीयमिदम्—
"अन्यासु तावदुपमर्दसहासु भृंग, लोलं विनोदयमनः सुमनो लतासु ।
मुग्धामजातरजसंकलिकामकाले, व्यर्थं कदर्थयसि किं नवमल्लिकायाः ।।"

(सूक्तिमुक्तावली)

+कवयित्री शीलाभट्टारिका राजशेखरेणाऽपि काव्य निदर्शने चर्चिताऽस्ति । धनदेवेन प्रसिद्ध कवयित्रीषु अस्याः गणना एवं कृताऽस्ति—"शीला-विज्जा-मारुला मोरिकाद्याः काव्यं कर्त्तुं सन्ति विज्ञा स्त्रियोऽपि ।" शार्ङ्गधरपद्धतौ विज्जकायाः काव्योत्कर्षः दण्डिन स्तुलनायां एवं वर्णितोऽस्ति ।
"नीलोत्पल दलश्यामा विज्जकां मामजानता ।
वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती ।।"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राग्वंगदेशीया फरीदपुर निवासिनी प्रियम्वदा ईस्वी षोडशीशती वर्तिनी आसीत्। अनया 'श्यामरहस्यं' सरसं काव्यं रचितम्। काव्यस्य प्रसादो माधुर्यं च प्रायः सर्वत्र प्रशंसनीये। कवयित्र्या काव्यस्य सहृदय-संवेद्यताऽत्र द्रष्टुं शक्यतेऽस्मिन् पद्ये—

"कालिन्दी पुलिनेषु केलिकलनं कंसादिदैत्यद्विषम्,
गोपालीभिरभिष्टुतं व्रजवधू नेत्रोत्पलैरर्चितम्।
बर्हालंकृतमस्तकं सुललितैरङ्गैस्त्रिभंगं भजे,
गोविन्दं व्रजसुन्दरं भवहरं वंशीधरं श्यामलम्॥" (श्यामरहस्यं, १)

बंगराज्ये फरीदपुरजनपदे धानुकग्रामे सप्तदशशताब्द्यां संजाता वैजयन्ती 'जयन्ती' कवयित्री मथुराभट्टस्य पुत्री कृष्णनाथस्य च विदुषी पत्नी आसीत्। अस्या एकमात्रचम्पूकाव्य कृतिः "आनन्दलतिकाचम्पूः[१]" प्राप्यते, यस्मिन् काव्यसौष्ठवसूचकः श्लोकोऽयं द्रष्टव्योऽस्ति—

"वह्निकोणगतो भानुः शीतात् संकुचितं दिनम्।
वैश्वानरो नरक्रोडे राजन् शीतस्य का कथा॥

(आनन्दलतिकाचम्पूः)

ईस्वी अष्टादशशताब्द्यामुदयेन्द्रपुरीया त्रिवेणी दाक्षिणात्य महिला-रचनाकारासु मूर्धन्या मन्यते। अस्याः स्तोत्रकाव्यकृतिषु—'लक्ष्मीसहस्रम्, रंगनाथसहस्रम् च, संदेशकाव्यग्रन्थेषु—शुकसन्देशः भृंगसन्देशश्च, नाट्य-ग्रन्थेषु—रंगाभ्युदयं, सम्पतकुमारविजयं, रंगराट्समुदयं तत्त्वमुद्राभद्रोदयं च प्रकीर्णग्रन्थेषु—हारति पञ्चकञ्च प्रसिद्धाः रचनाः सन्ति। तञ्जौर

१. कवयित्र्याः कर्तृत्वविषये डॉ॰ जतीन्द्रविमलचौधुरी प्रतिपादयति—Vaijayanti was a renowned poetess to whom a large number of verses are attributed. She was the joint author of Ānand Lalika Champu' as her husband Krishnanath explicitly mentions in the work itself that he collaborated with his wife in its composition."

—Sanskrit Poetesses, Pt. A., Calcatta, 1947. P. 57.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सरस्वतीनिलये विद्यमानवैविध्य-पूर्णकाव्यनाट्यकृतिभिरियं कवयित्री डॉ० एम० कृष्णमाचारीमहोदयेन सत्यमेव सर्वश्रेष्ठा स्वीकृता।

Among women, She (Poetess Triveni) stands foremost in poetic Contributions to Sanskrit Literature."[1]

त्रिवेण्याः काव्योत्कर्षसूचकं पद्यमेकमत्यन्तं चमत्कारपूर्णं प्रस्तूयतेऽत्र–

"परमादिषु मातरादिमं यदिमं कोशकृताहमध्यगम्।
अमरः किल पामरस्ततः स बभूव स्वयमेव मध्यमः॥"

(लक्ष्मीसहस्रम्)

एकोनविंशति शताब्द्यां मलाबार (केरल) प्रान्ते कोविलग्रामे लक्ष्मीराज्ञी 'सन्तानगोपालकाव्यं' रचितवती। कवयित्र्याः जीवनवृत्तस्य दृष्ट्या पद्यमिदं महत्त्वपूर्णं प्राप्यते—

"रोगार्त्तयाऽपि रविवर्मकुमारकस्य,
जातादरेण मनसा वचसि प्रकामम्।
मौर्ख्यं समर्प्य विगणय्य कृतं मयैतत्,
काव्यं मुदा बुधवराः परिशोधयन्तु॥"

लक्ष्मीराज्ञ्याः काव्ये वर्णननैपुण्यं सर्वत्र संलक्ष्यते। यथा—

"सितपयोधरचारुतराकृति र्विधूतनीलपटो मुसलायुधः।
इह च सम्प्रति नः शरणं भवान् क्षमयतामयतामधुमुल्वणम्॥"

(सन्तान० ३/२४)

अस्यां शताब्द्यामेव कर्णाटकस्य मैसूरनगरे नरसिंहाचार्यस्य पुत्री सुन्दरवल्ली कवयित्री रूपेण संजाता। अस्या अनेक प्रकीर्ण रचनाभिः सह 'रामायणचम्पूः' षट्सर्गात्मिका प्रबन्धरचना प्राप्यते, यस्याः प्रथमं प्रकाशनं १९१६ ई० वर्षे बंगलौरनगरे न्यासविद्यामुद्रणालयेऽभवत्। चम्पूकाव्य-साहित्येऽस्याः कृतेरत्यन्तं महत्त्वपूर्णं स्थानं वर्तते[2]।

1. History of Classical Sanskrit Literature, Delhi, 1970, (Chapter XVI Section I. P. 396.
2. Hist. of Classical Sankrit Lit. Delhi, 1971 Pt. IV P. 541.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तामिलनाडुप्रान्तस्य कुम्भकोणस्थाने एकोनविंशतिशताब्द्यां संजाता कवयित्री ज्ञानसुन्दरी कुप्पूस्वामिशास्त्रिणः सुयोग्या शिष्याऽऽसीत्। मैसूर महाराजेन इयं 'कविरत्नोपाधिना अलंकृता सम्मानिता चाऽभवत्। षट्स्तवकेषु संग्रथितः 'हालास्यचम्पूः' नाम्नोऽस्याः सुप्रसिद्धग्रन्थोऽस्ति। मीनाक्षीसुन्दरेश्वरपरिणयकाव्यमस्या अप्रकाशिता रचना एम० सूर्यनारायणशास्त्रिमतानुसारम्। यथा सः प्रतिपादयति—

'अनया (ज्ञानसुन्दर्या) मीनाक्षी सुन्दरेश्वर परिणयकाव्यं निर्मितम्। भाषा सुलभा, वर्णनानि च मनोहराणि।' (संस्कृतकविजीवितम्, प्रथमो भागः, हैदराबाद १९६०, पृ० २३३) कवयित्र्याः काव्यसौष्ठवसूचकः श्लोकोऽयमत्र प्रस्तूयते—

"मधुरीकृतगरलत्वात् मधुराभिख्यां तदा हि सा नगरी।
निजसीमस्थफणित्वात् विभाति हालास्य नामतश्चेह॥"

(हालास्य चम्पूः)

अपि चालंकारच्छटाऽवलोकनीयाऽस्मिन् पद्ये—

"तस्या ललाटलीनस्वाहापतिरेव शान्तसन्तापः।
रेजे कुङ्कुमतिलकव्याजान्नूनं मुधा हि कालविदः॥

(हालास्य चम्पूः, पृ० २८ श्री विद्या प्रेस, कुम्भकोणम् संस्करण, १९०६)

वर्तमानकालस्य विश्रुतमहिलारचनाकारासु मूर्धन्या पण्डिता क्षमा-रावमहोदया महत्त्वपूर्णं स्थानं भजते संस्कृत साहित्ये। अस्याः सुपरिचित-चरित काव्यरचनासु—तुकारामचरितं, श्रीरामदासचरितं, ज्ञानेश्वर-चरितं, मीरालहरी, शंकरजीवनाख्यानम् च, राष्ट्रियकाव्यरचनासु—सत्याग्रहगीता, उत्तरसत्याग्रहगीता, ग्रामज्योतिश्च, कथासाहित्ये— कथा-पंचकम्, कथामुक्तावली च यात्रासाहित्ये—विचित्रपरिषद्यात्रा इति ग्रन्था उल्लेखनीयाः सन्ति। कवयित्र्या स्वातंत्र्यविचारधारायां सशक्तकाव्यस्य वस्तुध्वनिपूर्णाऽभिव्यक्तिरियं दर्शनीया वर्तते—

"जीवन्तोऽपि न जीवन्ति परदास्य धुरन्धराः।
पारतंत्र्यमुदाराणां मरणादतिरिच्यते॥"

(सत्याग्रहगीता १/३६, उत्तर० सत्या० गी० १/२, ३/३२)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वियोग श्रृंगाराभिव्यंजकं पद्यमिदमवलोकनीयम्—

"निर्याते निखिलेऽपि बन्धुनिवहे प्राप्ते निशीथे जगत्,
निःशेषसुखनिद्रया हृतमभूद्व्रजे प्रशान्तिः परा।
शय्यागारसगात्तदा शशिकरैराभास्यमानं युवा,
सोत्कण्ठः परिकम्पमानहृदयः सर्वाङ्ग रोमाञ्चितः॥"

(मीरालहरी पूर्वखंड, ६)

तामिलनाडुराज्ये तञ्जौरोद्भवायाः कामाक्ष्याः 'रामचरितम्', आन्ध्रप्रदेशीयतिरुमलाम्बाया 'वरदाम्बिकापरिणयम्', रघुनाथराजस्य प्रेयसी रामभद्राम्बायाः 'रघुनाथाभ्युदयम्'[1], मद्रासे सिस्टर बालम्बाल-महाभागाया 'आर्यारामायणम्', दाक्षिणात्य कवयित्र्या अलमेलम्मायाः 'बुद्धचरितम्', डॉ० रमा चौधुर्याः 'शंकरशंकरम्', 'देशदीपम्', 'पल्ली-कमलम्', 'कविकुलकोकिलम्', 'मेघमेदुरमेदिनीयम्', 'युगजीवनम्', 'निवेदित-निवेदितम्', 'अभेदानन्दः', 'संसारामृतम्', 'नगरनूपुरम्', 'भारतपथिकः' 'कविकुलकमलम्', 'भारताचार्यः' प्रभृति नाट्यकाव्यकृतय उल्लेखनीयाः सन्ति। कवयित्र्याः काव्ये प्रसादः, गेयात्मकता च सर्वथा स्वाभाविकी अलंकारपूर्णा च विद्यते। अवलोकनीयं पद्यमिदं शंकरशंकरे—

"सुनीलगगने शीतलपवने चलति ज्योत्स्ना तरणी।
ऊर्मिमूलिका मेघमालिका नृत्यति मानस-भरणी॥" (शंकरशंकरम्)

---

१. रघुनाथस्य नायकत्वे कवयित्री प्रतिपादयति अस्मिन् ऐतिहासिककाव्य ग्रन्थे—

"शब्दार्थयोर्मर्म समप्रधानं वशंवदं यस्य भवन्ति सर्वे।
कृती स स्वात्र कृती सहायो, नाथो मम श्री रघुनाथनेता॥"

(रघुनाथाभ्युदयम्)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपि च पंकजनयना कथयति चम्पकवदनस्य अन्तिमे क्षणे इदं मार्मिकं [1]वचनम्—

"न पार्थिवो जात्वसि चम्पकस्त्वं, सः पारिजातः सुरलोक प्रजातः ।
देशस्य चेतः सरसि प्ररूढः पयोजवत्तिष्ठ चिरप्रकाशः ॥"

वस्तुतोऽर्वाचीन महिलारचनाकर्त्रीषु रूपकसाहित्यसर्जनादृष्ट्या डॉ॰ रमा चौधुरी सर्वश्रेष्ठं स्थानं भजते । पण्डिताक्षमारावपुत्र्या लीलारावदेव्या इमाः कृतयः महत्त्वपूर्णाः सन्ति—'गिरिजायाः प्रतिज्ञा', 'बालविधवा', 'होलिकोत्सवः', 'क्षणिकविभ्रमः', 'गणेशचतुर्थी', 'मिथ्या ग्रहणम्', 'असूयिनी', 'जयन्तु, कुमाउनीया' 'वीरभा' चेति । कवयित्र्याः काव्ये सानुप्रासं स्वाभाविकसौन्दर्यं सर्वत्र संलक्ष्यते । यथा—रेवायाः उक्ति र्द्रष्टव्या—

"ज्वालेयं जटिला पुण्या, दीपिकेति विभाव्यताम् ।
नीराज्यते यथास्माभिर्बुद्धिनेता बृहस्पतिः ॥"

(स्वर्णपुर कृषीवलम्, पृ॰ २६)

संगीतकाव्यरूपकेषु मध्यप्रदेशे सागरवासिन्याः डॉ॰ वनमालाया भवालकर्याः नाट्यकाव्यकृतिषु 'रामवनगमनम्', 'पार्वतीपरमेश्वरीयम्', 'पाददण्डश्च' प्रसिद्धाः रचनाः सन्ति । संगीतात्मक पृष्ठभूमौ माधुर्यप्रसाद-गुणपूर्ण गीतानां लालित्यं हृदयावर्जकं प्राप्यते । यथा—ललिताया गीतिः पाददण्डे—'नन्दनं प्रियरञ्जनम् ।

कलमञ्जुलमञ्जीरशिञ्जितं मानस हंसी विभ्रमम् ।

प्रभुवन्दनम् । नन्दनं

कदम्ब चम्पक बकुला लम्बित कुन्दमालती मण्डनम् ।

मंगलं प्रभुवन्दनम्

१. देशदीपम्, डॉ॰ रमा चौधरीः ३।१२
डॉ॰ रामजी उपाध्यायः समालोचयति नाट्यकृतिमिमां नाट्यशास्त्रीय दृष्ट्या, अवलोकनीयः—"आधुनिक संस्कृत नाटकः", (द्वितीयो भागः), सागरम्, सं॰ २०३५ वि॰, पृ॰ १०८३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्दसमीरणमुखरितवंशं निकुञ्जलतिकादोलनम्। प्रभुवन्दनम्।···
इन्दीवरमकरन्दमदकलं मिलिन्दालि मधुगुञ्जनम्।

प्रभुवन्दनम्। नन्दनं प्रियरञ्जनम्+[१]

कर्णपुरवासिन्याः डॉ० नलिनीशुक्ल 'व्यथितायाः' काव्यकथाकृतिषु 'भावाञ्जलिः', 'प्रकीर्णम्', 'स्वरूपलहरी', 'कथासप्तकञ्चोल्लेखनीयाः रचनाः सन्ति। उत्तरप्रदेश सर्वकारेण मौलिककाव्यरचनायै कवयित्रीयं बहुशः पुरस्कृताऽस्ति। कवयित्र्याः 'काव्ये विद्यमानगेयता कोमलकान्त-पदावली चास्मान् जयदेवकृतगीतगोविन्दं स्मारयति। यथा—

"विषयसमीरे सरसि गभीरे विहरति मानस मीनः।
मकर इवायं विहरति लोभः प्रहरति भृशमतिपीनः॥"

(भावा०, पृ० १४)

अपि च

"प्रिये! चारुशीले। क्षणं मुञ्च मानम्।
सुधां ये मुखान्निःसृतां देहिदानम्॥" (राधानुनयः)

बिहारराष्ट्रभाषापरिषदि शोधसहायिका डॉ० मिथिलेशकुमारी मिश्रायाः 'सुभाषितसुमनोऽञ्जलिः', 'व्यास शतकम्', आम्रपाली (नाटिका) च बहुचर्चिताः रचनाः सन्ति। कवयित्र्याः नीतिसम्बन्धि-पद्यानि हृद्यानि ललितललितानि च भर्तृहरितुल्यानि सन्ति। यथा—

"न यस्य गाथा भुवनेषु गेया, न धारणा याति च यस्य धर्मे।
न वै कृतं येन सुकर्म किञ्चित्, लोकेषु तज्जन्म निरर्थकम् हि॥

(सुभाषित०, पृ० ६)

१. पाद दण्डः, संस्कृत परिषद्, सागर, सं० २०२० वि० (ललितायाः गीतिः) द्रष्टव्यः कवयित्र्याः सागरिकायां प्रकाशितो लेखः" आधुनिक संस्कृत साहित्ये स्त्री लेखिकानां योगदानम्' सागर, १९७० (सागरिका १५।२ अंकः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कवयित्री राष्ट्रियभावनां राष्ट्रभक्ति च स्वकाव्ये सम्यक् प्रतिपादयति यथास्थानम्।[1] डॉ० मनोरमायाः;काव्यसंकलनं 'संस्कृत गीतमालिका' सामयिक समारोहऋतुवर्णने लोकगीतपूर्णं विद्यते। यथा दृश्यते लोकगीतमधोलिखित पंक्तिषु—'चित्रां चुनरिकामानय प्रियतम! आगतश्चैत्रमासः मात्रा दत्ता पीतशाटिका, पित्रा दत्ता हेममालिका। हीरकहारमानय प्रियतम! आगतश्चैत्रमासः[2]।

संस्कृत पत्रपत्रिकासु चापि संस्कृत कवयित्रीभिराभिः सह दुर्गा झा[3], अनितामिश्रा[4], कमलारत्नम् प्रभृतिमहिलारचनाकाराणां समसामयिकलोकजीवनस्य यथार्थचित्रणे चिन्तनपूर्णाः सरसाः काव्यरचनाः सम्प्राप्यन्ते।

संक्षेपे, संस्कृत साहित्यं सुप्रसिद्ध महिलारचनाकाराणां भक्ति-(स्तोत्र) काव्य, चरितकाव्य, स्वदेशप्रेम राष्ट्रियैकता लोकगीत, चम्पूकाव्य नाट्य संगीतकाव्य कथाप्रभृति वैविध्यपूर्णविधानां नैकक्तिभिः सुसमृद्धं संलक्ष्यते। इति शम्।

१. राष्ट्र धर्म इति पूर्ण स्वदेश भक्तिः शक्तिश्च तस्य सततं परिवर्धनीया।
किं वा शरीर बलपौरुष विक्रमैश्च, देशस्य त्वात्मगुरुता ननु रक्षणीया॥
(सुभाषित० पृ० ६)

२. संस्कृतगीतमालिका, लखनऊ, १९८१, पृ० १४

३. सर्वगन्धा ५।४ अंक जुलाई, १९८१ "सास्मितिः" सर्वगन्धा, नवम्बर, १९८०, पृ० ७, ७।४-५ अंक, १९८३, "जागृतनार्यः" शीर्षक रचना, ७।२ अंक "नागरिका" पृ० १२

४. आकाशवाणी लक्ष्मणपुर केन्द्रेण लेखकस्य दिनांके २।२।८६, २।७।८६ प्रसारिता संस्कृतवार्ता (संस्कृत कार्यक्रमे)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राष्ट्रिय संस्कृत संस्थानस्य प्रकाशनानि

भारत सरकार के मानस संसाधन विकास मंत्रालय के अधीन राष्ट्रिय संस्कृत संस्थान एक स्वायत्तशासी संस्था है। इसके द्वारा आठ केन्द्रीय संस्कृत विद्यापीठ (दिल्ली, तिरुपति, जम्मू, इलाहाबाद, गुरुवायूर, जयपुर, लखनऊ तथा पुरी) में संचालित हैं।

संस्थान को प्रसन्नता है कि इसने अब तक अपने मुख्यालय एवं सम्बद्ध केन्द्रीय संस्कृत विद्यापीठों के माध्यम से संस्कृत वाङ्मय के विभिन्न पक्षों—जैसे आलोचना, इतिहास, भाषाविज्ञान, जीवनी, शोध तथा दुर्लभ एवं अप्राप्य पाठ्य ग्रंथों के प्रणयन एवं प्रकाशन करने का गौरव प्राप्त किया है।

पुस्तक सूची के अनुसार क्रेताओं से आग्रह है कि वे कृपया पुस्तक खरीदने एवं इस सम्बन्ध में विशेष जानकारी प्राप्त करने के लिए तत्तद् विद्यापीठ के प्राचार्य/अधिकारियों से सीधा सम्पर्क करें।

विक्रय नियम

1. पुस्तकें अग्रिम भुगतान के बाद ही भेजी जाती हैं।
   भुगतान, मनीआर्डर द्वारा अथवा बैंक ड्राफ्ट द्वारा सम्बद्ध विद्यापीठ के प्राचार्य को किया जाना चाहिए।
2. डाक व्यय एवं पैकिंग के लिए अलग से भुगतान करना होगा।
3. हमारे प्रकाशन की खरीद पर मिलने वाली छूट की दरें निम्नलिखित हैं :—

(1) अध्यापक और छात्र	15%
(2) पुस्तकालय	
(क) पाठ्यपुस्तकों पर	15%
(ख) शोध-पत्रिका	25%
(ग) अन्य प्रकाशन	20%
(3) पुस्तक विक्रेता	40%

CC-0. Nepal Sanskrit Academy, Kathmandu Collection